Almira 3
Shelf 2
10

[illegible]

1. Maharaja Jang Bahadur Vir Smarana Vishayini Tripushpamala
2. Batuka Bhairava Stotra
3. Chando Vritti Of Bhatta Halayudha
4. Chaura Panchashika Of Bilhana 1798
5. Chando Manjari
6. Uttara Ramacaritam Of Bhavabhuti
7. Gita Govinda
8. Naishadhiya Charita

४२५४

श्री ५ को सरकार
[illegible] संस्कृत [illegible]

महाराजजङ्गबहादुरवीर
स्मरणविषयिणीगी
तिपुष्पमाला प्रारंभः॥

श्री गणेशाय नमः॥ ॥कस्माद्धराहसतिनौरव
हीनमास्ते श्रीश्चं विसर्पति रविश्चरमाचलं स्वम्॥
शाखादुमस्थितविहङ्गमपङ्क्तिरापन्निःशाद्व
लो नरगणः स्वसवाष्पनेत्रैः॥१॥ राज्ञः पथो धवलि
तो जनतामिपूर्णो हाहारवश्चरति तत्परमेव दि
क्षु॥ कस्मात्त्रुतिध्वनितकम्पितहैमशैलो हाहाक
रेति गदतीव पुनः पुनस्तत्॥२॥ नेपालमण्डलकपि
द्रं कथमद्य चूर्णरुजाधरा नतमुखः स्थिरतां विहाय॥

पश्यंतो विकसितं सदिगन्तरान्धं दैवेन राजस
रसः सहसा किन्तु पद्मम्॥३॥ लुप्तं विभाकरकुलं म
लिनं विधाय क्षात्रं बलं समुदितं प्रसभं निमी
ल्य॥ नेपालराज्यमधुना तमसा प्रपूर्य लुप्तं
भविष्यति पुनर्न कदापि दीप्तम्॥४॥ त्वं भास्क
र प्रतिदिनं निजरश्मिजालं विस्तारयन्त्रिभुवनं
स्वकरैर्विबोध्य॥ संमुद्रितं कनकपद्ममकाल
रात्रौ न स्यात्तु बोधितमिदन्तु पुनः कदापि॥५॥

द्वितीयम्.

गाधेः कथं दक्षादितोवत पूरयित्वा कक्षात्र धाम
विगतोः सिवद न्य जस्रम्॥ नेपालराज्यत
रोधकारी सूर्यः प्रयात्यसमयेस्तगहं विरय॥६॥
नेपंकराल रजनी भविता प्रभाताकिं नु प्रसा
रयतु तामसमेव घोरम्॥ नित्य श्रमाप गमका
रणमस्तशयां प्रमुस्का पुनर्नमर्वीना भाविता
प्रकाशः॥७॥ नेपालराज्य कमलाक मला
मनेनफूली विलजगिठ ननु र्विलापन्य जस्रम् श्रीः

द्वितीयम्.

संपन्नितद्विक्षणभीषणकालसर्पोवीरः सुतःस
मुदितोमुदितोपदस्याः ॥८॥ सर्वेऽधुनासुग
पदञ्चविलापरैलैर्दिग्मण्डलं जहनकानन
मद्रिरन्ध्रम् ॥ व्याप्यक्षितिं जनगणाः परिकं
पयन्तुनासोपुनर्नञ्चायनाद्रु विनाविनिद्रुः ॥९॥
नासोहसिष्यतिसुताननपूर्णचन्द्रं प्रेमास्प
दं प्रियतमास्वपुनः समीक्ष्य ॥ रात्रिन्दिवन्तु है
दयेनिहितोजनानांनिदुष्यतीहनयनाध्व

विहायदीर्घम्॥१०॥रूपंभटागजघटानदिशा
दिशिश्रेल्र्यैं स्वचक्रमुद्रोधरलीसुगुप्त
म्॥स्नंविनिद्रुमदहोग्रातकोटिवाघैर्नालंप्र
बोधयितुमद्यकिमुद्रिनाक्षम्॥११॥नासौप्रया
स्यतिपुनर्द्विरदाश्वपादैः संकंपयन्क्षितित
लंरजसांप्रपातैः॥आच्छादयन्नपनतिग्म
विलोलनेजउन्नेजयिष्यतिनवाणुतथाप्र
पातैः॥१२॥नासौनृपस्यसभितौसमवेनलो

कानानेव्यलिप्रथितपटुनिमुग्रवीर्यैः॥ नोवा
पुनःप्रकृतिसुन्दरवसुवर्गैंसेलोक्यमगध
करणो भविता कदापि॥१३॥ प्रापान्पतःसु
रगणैरुपसेव्यमानः शृण्वन्मधुस्वरल
याप्सरसांचगीतिम्॥ यत्रस्थिताकृपयु
धिष्ठिरभीमकर्णभीष्मार्जुनप्रभृतयोवसु
धैकवीराः॥१४॥ यत्रयाधतेस्मिन्नमुखाः स
हसोपजग्मुरहलनिपातिगुणत्वंवितनं

चतुर्थम्

प्रसार्य ॥ मध्ये निधाय करवालकपालहस्तं दीर्घ
बलोद्धतमसृंचमुदालपन्ति ॥१५॥ प्रार्थ्यः सु
रद्धुवराधरणिमौलकीर्तिकान्तिं पुत्रः पितुर्ध
रतु पद्धतिमावलम्ब्य ॥ देशस्थलोकहृदपा
दपनीयशोकं भास्वद्गुरोरभिरुता सुरसा
सुनाम ॥१६॥ ॥ इति श्रीमन्नेपालदेशीय
महाराजजङ्गबहादुरवीरस्मरणविषयिणी
गीतिपुष्पमाला समाप्ता ॥ ॥ ॥ ॥ ॥

श्रीः

चतुर्थम्

पंचमम्

वाणानलग्रहेन्दुऽब्दे ऽस्मिन्ने च मधुसंज्ञके ॥ मन्दुवा
रे त्वस्माव ग्रंथं यज्ञनाथो ऽलिखत्स्वयम्॥ ॥
दूष्यां गीतानमुस्मत्यरलोपः परिवर्जयेत्॥ ज
यत्नस्यैव सर्वत्र शंकरो रक्षिता यदि ॥१॥ ओम् ॥ ॥

* * *

पंचमम्

चतुथ.

महाराज जङ्ग बहादुरकीः
रस्मरणिविधथिलीगी
तिपुष्पमाला
॥ समाप्ता ॥

इति बटुक भैरवस्तोत्रं समाप्तम्.

४२५२

श्री ५ को सरकार

अथ बटुकभैरवस्तोत्र प्रारम्भः ॥

श्रीगणेशायनमः ॥ अथ आपदुद्धारक वटुकभैरवस्तोत्रं प्रारभ्यते ॥ सूत उवाच ॥ मेरुपृष्ठे सुखासीनं देवदेवं त्रि-
लोचनम् ॥ शङ्करं परिपप्रच्छ पार्वती परमेश्वरम् ॥१॥ पार्वत्युवाच ॥ भगवन्सर्वधर्मज्ञ सर्वशास्त्रागमादिषु
॥१॥ ॥ आपदुद्धारणं मन्त्रं सर्वसिद्धिविधायकम् ॥२॥ सर्वेषाञ्चैव भूतानां हितार्थं वाञ्छितं मया ॥ विशेषत-
स्तु राज्ञां वै शान्तिपुष्टिप्रसाधनम् ॥३॥ अङ्गन्यासकरन्यासदेहन्याससमन्वितम् ॥ वक्तुमर्हसि देवेश
मम हर्षविवर्द्धनम् ॥४॥ ईश्वर उवाच ॥ शृणु देवि महामन्त्रमापदुद्धारहेतुकम् ॥ सर्वदुःखप्रशमनं सर्वश-
त्रुविनाशनम् ॥५॥ अपस्मारादिरोगाणां ज्वरादीनां विशेषतः ॥ नाशनं स्मृतिमात्रेण मन्त्रराजमिमं प्रिये ।
॥६॥ ग्रहराजभयानां च नाशनं सुखवर्द्धनम् ॥ स्नेहाद्वक्ष्यामि ते मन्त्रं सर्वसारमिमं प्रिये । ॥७॥ प्रण- ॥१॥
वं पूर्वमुद्धृत्य देवी प्रणवमुद्धरेत् ॥ वटुकायेति वै पश्चात् आपदुद्धारणाय च ॥८॥ कुरु द्वयं ततः पश्चात्

वटुकाय पुनर्वदेत् ॥ देवीप्रणवमुद्धृत्य मन्त्रोद्धारमिमं प्रिये १ ॥ ९॥ मन्त्रोद्धारमिमं पुण्यं त्रैलोक्ये चातिदुर्लभम् ॥
अप्रकाश्यमिमं मन्त्रं सर्वशक्तिसमन्वितम् ॥ १०॥ स्मरणादेव मन्त्रस्य भूतप्रेतपिशाचकाः ॥ विद्रवन्ति भीता वै
कालरुद्रादिव प्रजाः ॥ ११॥ ॐ ह्रीं वटुकाय आपदुद्धारणाय कुरु कुरु वटुकाय ह्रीं ॥ द्वाविंशत्यक्षरो मन्त्रः सर्वसि
द्धिप्रदायकः ॥ सर्वकामार्थदं मन्त्री राज्यभोगप्रदन्नृणाम् ॥ १२॥ पठेद्वा पाठयेद्वापि पूजयेद्वापि पुस्तकम् ॥
नाग्निचौरभयं तत्र ग्रहराजभयं तथा ॥ १३॥ न च मारीभयं किञ्चित्सर्वत्र सुखवान् भवेत् ॥ आयुरा
रोग्यमैश्वर्यं पुत्रपौत्रादिसम्पदः ॥ १४॥ भवन्ति सततं तस्य पुस्तकस्यापि पूजनात् ॥ पार्वत्युवाच ॥ कए
ष भैरवो नाम आपदुद्धारणो मतः ॥ १५॥ तस्य नामसहस्राणि प्रयुतान्यर्बुदानि च ॥ त्वया च कथितो देवो भैरवः
कल्पवित्तमः ॥ १६॥ सारमुद्धृत्य तेषां वै नामाष्टशतकं वद ॥ यानि सङ्कीर्त्य मर्त्यः सर्वदुःखविव
र्जितः ॥ १७॥ सर्वान्कामानवाप्नोति साधकः सिद्धिमेव च ॥ ईश्वर उवाच ॥ शृणु देवि ! प्रवक्ष्यामि भैर-
वस्य महात्मनः ॥ १८॥ आपदुद्धारकस्येह नामाष्टशतमुत्तमम् ॥ सर्वपापहरं पुण्यं सर्वापद्विनिवारणम् .

॥१९॥ सर्वकामार्थदं देवि? साधकानां सुखावहम् ॥ सर्वमङ्गलमाङ्गल्यं. सर्वोपद्रवनाशनम् ॥२०॥
॥२॥ रुद्रारण्यको नाम .ऋषिर्देवोऽथ भैरवः॥ नामाष्टशतकस्यास्य छन्दोनुष्टुप् प्रकीर्तितम् ॥२१॥
अष्टवाहुं त्रिनयनं. इतिवीजं समीरितम् ॥ शक्तिः ॐ कीलकं.शेषं मिष्टसिद्धौ नियोजयेत् ॥२२॥
ॐ रुद्राय नमः, अङ्गुष्ठयोः ॥ ॐ शिखी.भरवाय नमः तर्जन्योः ॥ ॐ शिवाय नमः मध्यमयोः
ॐ त्रिशूलिने नमः अनामिकयोः ॥ ॐ ब्रह्मरो नमः कनिष्ठिकयोः ॥ ॐ त्रिपुरान्तकाय नमः तल
योः ॥ ॐ भीमाक्षिने नमः कराग्रे ॥ ॐ सदा शिवाय नमः करपृष्ठे ॥ ॐ भैरवाय नमः मूर्ध्नि ॥
ॐ भीमदर्शनाय नमः ललाटे ॥ ॐ भूतहननाय नमः नेत्रयोः ॥ ॐ सारमेयानुगा –

॥२॥

यनमः भ्रुवोः ॥ ॐ भूतनाथायनमः कर्णयोः ॥ ॐ प्रेतवाहनायनमः कपोलयोः ॥ ॐ भस्माङ्गायनमः, नासापुटयोः ॥
ॐ सर्पभूषणायनमः, ओष्ठयोः ॥ ॐ अनादि भूतायनमः, आस्ये ॥ ॐ शक्तिहस्ताय नमः, गले ॥ ॐ दैत्यसम्म
र्दनायनमः स्कन्धयोः ॥ ॐ अतुलतेजसेनमः बाह्वोः ॥ ॐ कपालिनेनमः पाण्योः ॥ ॐ मुण्डमालिनेनमो हृदये ॥ ॐ
शान्तायनमो वक्षस्थले ॥ ॐ कामचारिणेनमः स्तनयोः ॥ ॐ सदातुष्टायनमः, उदरे ॥ ॐ क्षेत्रज्ञायनमः पार्श्व
योः ॥ ॐ क्षेत्रपालायनमः पृष्ठदेशे ॥ ॐ क्षेत्रजायनमो नाभिदेशे ॥ ॐ पापौघनाशिनेनमः कट्याम्
ॐ बटुकायनमो लिङ्गदेशे ॥ ॐ रक्षाकराय नमो गुददेशे ॥ ॐ रक्तलोचनायनमः, ऊर्वोः ॥ ॐ घुर्घुरारवा
नमो गुल्फयोः। ओं सुरेशाय
य नमो जान्वोः ॥ ॐ रक्तपाणयेनमो जङ्घयोः ॥ ॐ पादुकासिद्धाय नमः पादपृष्ठे ॥ ॐ आपदुद्धारके
टुकायनमः आपादमस्तके ॥ ॐ डमरुहस्तायनमः पूर्वे ॥ ॐ दण्डधारिणेनमो दक्षिणे ॥ ॐ खड्गहस्ता
यनमः पश्चिमाम् ॥ ॐ घण्टावादिनेनमः, उत्तरे ॥ ॐ अग्निवर्णाय नम आग्नेय्याम्, ॥ ॐ दिगम्बरायनमो.

नैरृत्याम् ॥ ॐ सर्वभूतस्थाय नमो वायव्ये ॥ ॐ अष्टसिद्धिदाय नम ईशान्याम् ॥ ॐ खेचरिणे नम ऊर्ध्वे ॥ ॐ रौद्ररूपिणे नमः पाताले ॥ एवं विन्यस्य देहे स्वे षडङ्गेषु ततो न्यसेत् ॥ ॐ भूतनाथाय नमो हृदये ॥ ॐ आदिनाथाय नमो मूर्ध्नि ॥ ॐ आनन्दनाथाय नमः शिखायाम् ॥ ॐ सिद्धखेचरनाथाय नमः कवचाय हुम् ॥ ॐ सहजानन्दनाथाय नमो नेत्रत्रयाय वौषट् ॥ ॐ निःसीमानन्दनाथाय नमः अस्त्राय फट् ॥ एवं न्यासविधिं कृत्वा यथावत्तदनन्तरम् ॥ ध्यानं तत्र प्रवक्ष्यामि यथा ध्यात्वा पठेन्नरः ॥ १ ॥ शुद्धस्फटिकसंकाशं सहस्रादित्यवर्चसम् ॥ निलजीमूतसङ्काशं नीलाञ्जनसमप्रभम् ॥ २ ॥ अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम् ॥ दंष्ट्राकरालवदनं नूपुरारावसङ्कुलम् ॥ ३ ॥ भुजङ्गमेखलं देवमग्निवर्णं शिरोरुहम् ॥ दिगम्बरं कुमारेशं वटुकाख्यं महाबलम् ॥ ४ ॥ खट्वाङ्गमपि पाशं च शूलं दक्षिण

भागत: ॥ डमरुं च कपालं च. वरदं भुजगीं तथा ॥५॥ अग्निवर्ण समोपेतं सारमेय समन्वितम् ॥
ध्यात्वा जेपत्सुसन्तुष्ट: सर्वान्कामानवाप्नुयात् ॥६॥ करकलित कपाल: कुण्डली दण्डपाणिस्तरुण
तिमिर नील व्याल यज्ञोपवीती ॥ क्रतुसमय सपर्या विघ्नविच्छेद हेतुर्जयति वटुकनाथ: सिद्धिद:
साधकानाम् ॥७॥ अस्य श्री वटुक भैरवस्तव राजस्य आपदुद्धारणस्य बृहदारण्यक
ऋषि: ॥ अनुष्टुप् छन्द: ॥ आपदुद्धारण वटुक भैरवो देवता ॥ अष्टबाहुं त्रिनयनमिति वीजम् ॥
कैं शक्ति: ॥ शेषं कीलकम् ॥ ममाभीष्ट सिद्ध्यर्थं जपविनियोग: ॥ ॐ बृहदारण्यक ऋषये
नम: शिरसि ॥ ॐ अनुष्टुप् छन्दसे नमो मुखे ॥ ॐ अवबाहु वटुक भैरव देवतायै नमो हृदि ॥
अष्टबाहुं त्रिनयनमिति वीजाय नमो गुह्ये ॥ ॐ कैं शक्तये नम: पादयो: ॥ ॐ शेषमिति कीलकाय

नमः सर्वाङ्गे ॥ ॐ ह्रीं वीं अङ्गुष्ठाभ्यां नमः ॥ ॐ ह्रीं वीं तर्जनीभ्यां नमः ॥ ॐ ह्रूं वूं मध्यमाभ्यां नमः ॥
ॐ ह्रैं वैं अनामिकाभ्यां नमः ॥ ॐ ह्रौं वौं कनिष्ठिकाभ्यां नमः ॥ ॐ ह्रः वः करतलकरपृष्ठाभ्यां

नमः ॥ एवं हृदयादि ॥ ॐ भूर्भुवः स्वरोम्, इति दिग्बन्धः ॥ ॐ भूतनाथाय नमः, अङ्गुष्ठाभ्यां नमः
ॐ अनादिनाथाय नमः, तर्जनीभ्यां नमः ॥ ॐ आनन्दनाथाय नमः मध्यमाभ्यां नमः ॥ ॐ
सिद्धखेचराय नमः, अनामिकाभ्यां नमः ॥ ॐ सहजानन्दनाथाय नमः, कनिष्ठिकाभ्यां
नमः ॥ ॐ त्रिः सीमानन्दनाथाय नमः करतलकरपृष्ठाभ्यां नमः ॥ ॐ भूतनाथाय नमो हृदि ॥
ॐ आदिनाथाय नमो मूर्ध्नि ॥ ॐ आनन्दनाथाय नमः शिखायाम् ॥ ॐ सिद्धखेचराय नमः

कवचाय हुम् ॥ ॐ सहजानन्दनाथाय नमो नेत्रत्रयाय वौषट् ॥ ॐ त्रिः सीमानन्दनाथाय नमः

अस्त्राय फट् ।। अथ सात्विक ध्यानम् ।। वन्दे वाली स्फटिक सदृशी कुण्डलोद्भासिवक्त्री दिव्याकल्पैर्नव मणि-
मयैः किङ्किणी नूपुराद्यैः ।।दीप्ताकारी विशदवसनी सुप्रसन्नी त्रिनेत्री हस्ताब्जाभ्यी वटुक मनिशी शूलख-
ड्गौ दधानम् ।। १।। अथ राजस ध्यानम् ।। उद्यद्भास्कर सन्निभी त्रिनयनी रक्ताङ्गरागस्रजी स्मेरास्यी वरदं कपा-
लमभयी शूली दधानी करैः ।। नीलग्रीव मुदार कौस्तु भधरी सीतांशु चण्डोज्ज्वली बन्धूकारुण वाससी भयहरी
वन्दे सदा भैरवम् ।।२।। अथ तामस ध्यानम् ।। ध्यायेन्नी लाद्रिकान्ती शशिशकल धरी मुण्डमाली महेशी
दिग्वस्त्री पिङ्गकेशी डमरु मथ सृणी शूल खड्गौ दधानम् ।। नागी घीटी कपाली करसरसि रुहै र्बिभ्रती भी-
मदंष्ट्री सर्पोकल्पी त्रिनेत्री मणिमय विलसा किङ्किणी नू पुराढ्यम् ।।३।। अतितीक्ष्ण महाकाय कल्पान्त-
दहनोपम ।। भैरवाय नमस्तुभ्य मनुज्ञी दातुमर्हसि ।। ४।। शान्ती पद्मासनस्थी शशधर मुकुटी पञ्चवक्त्री
त्रिनेत्री शूली वज्री च खड्गी परशु मसलके दक्षिणाङ्गे वहन्तम् ।। नागी पाशी च घण्टी प्रलय हुतवहं सा-

डुं श्री वामभागे · नानालङ्कार युक्तं स्फटिक मणिनिभं · नौमि तस्यै शिवाख्यम् ।।५।। अथ मूलमन्त्रजपः १०

ॐ भैरवो · भूतनाथश्च भूतात्मा · भूतभावनः ।। क्षेत्रज्ञः क्षेत्रपालश्च · क्षेत्रदः क्षत्रियो · विराट् ।। १ ।। श्म·

शान वासी · मांसाशी · खर्पराशी · स्मरान्तकः ।। शा रक्तपः पानदः सिद्धः सिद्धिदः सिद्धसेवितः ।।२।।

।।५।। कङ्कालः कालशमनः क लाकाष्ठा तनुः कविः ।। त्रिनेत्रो बहुनेत्रश्च तथा पिङ्गल·लोचनः ।।३।।

शूलपाणिः खड्ग पाणिः कङ्काली धूम्रलोचनः ।। अभीरुर्भैरवी नाथो ·भूतपो योगिनीपतिः ।।४।। धन·

दो धनहारी च · धनवाप्रीति भानवान् ।। नागहारो नागपाशो व्योमकेशः कपालभृत् ।।५।। का·

लः कपाल · माली च · कमनीयः कलानिधिः ।। त्रिलोचनो ज्वलन्नेत्र·स्त्रिशिखीच त्रिलोकपः

।।६।। त्रिनेत्र तनयो डिम्भः शान्तःशान्त जनप्रियः ।। बटुको बटुवेशश्च खट्वाङ्ग वरधारकः ।।७।। ।।५।।

भूताध्यक्षः · पशुपति भिक्षुकः ...

पीरचारकः धूर्तो दिगम्बरः शूरो हरिणः पाण्डुलोचनः ॥ ८॥ प्रशान्तः शान्तिदः शुद्धः शङ्करप्रियबान्धवः ॥ अष्टमूर्त्ति
र्निधीशश्च ज्ञानचक्षुस्तपोमयः ॥ ९॥ अष्टाधारः षडाधारः सर्पयुक्तः शिखीसखः ॥ भूधरो भूधराधीशो भूपति
र्भूधरात्मजः ॥१०॥ कङ्कालधारी मुण्डी च आश्र यज्ञोपवीतवान् ॥ जृम्भणो मोहनस्तम्भी मारणः क्षोभणस्त
था ॥११॥ शुद्धनीलाञ्जनप्रख्यो दैत्यहा मुण्डभूषितः ॥ बलिभुग्बलिभुङ्नाथो बालो बालपराक्रमः ॥१२॥
सर्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः ॥ कामो कलानिधिः कान्तः कामिनीवशकृद्वशी ॥१३॥ सर्वसिद्धिप
दो वैद्यः प्रभुर्विष्णुरितीव हि ॥ पुनर्मूलमन्त्रजपः १०८ ॥ अष्टोत्तरशतं नाम्नां भैरवस्य महात्मनः ॥ मया ते क
थितं देवि! रहस्यं सर्वकामदम् ॥ १४॥ य इदं पठते स्तोत्रं नामाष्टशतमुत्तमम् ॥ न तस्य दुरितं किं
ञ्चित् रोगाणां च भयं नहि ॥१५॥ न शत्रुतो भयं किञ्चित् प्राप्नुयान्मानवः क्वचित् ॥ १६॥ पातकानां
भयं नैव यः पठेत् स्तोत्रमुत्तमम् ॥ मारीभये राजभये तथा चौराग्निजे भये ॥१७॥ औत्पातिके महाघोरे

[illegible] ॥ थाद्रुः स्वप्नदर्शने ॥ बन्धने च महाघोरे पठेत्स्तोत्रमनुत्तमम् ॥ १८ ॥ सर्वं प्रशमती याति
भयं भैरवकीर्तनात् ॥ एकादशसहस्रैस्तु पुरश्चरणमुच्यते ॥ १९ ॥ यस्त्रिसंध्यं पठेद्देवि ! संवत्सरमतन्द्रि
तः ॥ स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मानवः ॥ २० ॥ षण्मासं भूमिकामस्तु जपित्वा प्राप्नुयान्महीम् ॥
॥६॥ राजशत्रुविनाशार्थं जपेन्मासाष्टकं यदि ॥ २१ ॥ रात्रौ वारत्रयं चैव नाशयत्येव शात्रवान् ॥ जपेन्मास
त्रयं मर्त्यो राजानं वशमानयेत् ॥ २२ ॥ धनार्थी च सुखार्थी च दारार्थी यस्तु मानवः ॥ जपेन्मास
त्रयं देवि ! वारमेकं तथा निशि ॥ २३ ॥ धनं पुत्रांस्तथा दारान् प्राप्नुयान्नात्र संशयः ॥ निगडेचा
पि यो बद्धः कारागृहनिपातितः ॥ २४ ॥ शृङ्खलाबन्धनप्राप्तः पठेच्चैव दिवानिशि ॥ यान्यान्समीहते
कामांस्तांस्तान् प्राप्नोत्यसंशयः ॥ २५ ॥ अप्रकाश्यमिदं गुह्यं न देयं यस्य कस्यचित् ॥ सु
कुलीनाय शान्ताय ऋजवे दम्भवर्जिते ॥ २६ ॥ देयं स्तोत्रमिदं पुण्यं सर्वकामफलप्रदम् ॥ भैरवो ॥६॥

·पि ब्रह्म वो भूतस्वयं च परमेश्वरः ॥२७॥ एवं श्रुत्वा ततो देवी नामाष्ट शतमुत्तमम् ॥ सन्तोषं परमं प्राप्य भैरवस्य महात्मनः ॥२८॥ जजाप परया भक्त्या तदा सर्वेश्वरे श्वरी ॥

॥७॥

इति श्री · रुद्रयामले · हरगौरी · संवादे बटुक भैरवस्तोत्रं समाप्तम् ॥

हरतु कुल गणेशो विघ्नसङ्घान् शेषान्-
नयतु कुल सपर्यां पूर्णतां · साधकानाम् ॥
पिबतु बटुक नाथः शोणितं · निन्दकानी
वितरतु सहि कामान् कौलीकानी गणेशः ॥ १॥

शुभं भूयादिति शम् ॥

॥७॥

इति बटुक भैरवस्तोत्रं समाप्तम्:

द्विरवाविपर्य्येस्तार्द्धो।८।४९।लपूर्व्वस्थे सङ्ख्योतिः।८।५०।गस्थैस्सौम्या।८।५१।चूलिकैकोनत्रिंशदेकत्रिंशदन्तेगा।
।८।५२।मात्रेननसमालां ग्लः।८।५३।इति भट्टहलायुधकृतायां छन्दोवृत्तौ चतुर्थोध्यायः समाप्तः॥ ⊙ ॥

निगोजारिणा।३।६४।इतिभट्टहलायुधकृतायांछन्दोवृत्तौतृतीयोध्यायः॥चतुःशतमुत्कृतेः।४।१।चतुरभ्यस्त्यजेदुत्कृतेः।
।४।२।तान्यपिसंख्याप्रभ्यस्तकृतिः।४।३।प्रकृत्यागोपसर्गवर्जितः।४।४।छन्त्यष्टित्रार्करीजगत्यः।४।५।पृथक्पृथक्पू
र्वतस्तान्येवेषाम्।४।६।द्वितीयद्वितीयमन्ततिः।४।७।अथलौकिकम्।४।८।आत्रेसमास्वयदार्षम्।४।९।पादश्चतुर्भा
गः।४।१०।यथावृत्तसमाप्तिर्वा।४।११।ल्नःसमुद्रागणाः।४।१२।गोन्तेनमध्यादिलघु।४।१३।स्वराअर्द्धञ्चार्यार्द्धम्
।४।१४।अत्रायुङ्नजा।४।१५।षष्ठोज।४।१६।न्लौवा।४।१७।न्लौदेत्पदंद्वितीयादिः।४।१८।सप्तमःप्रथमादिः।४।
१९।अन्त्येपञ्चमः।४।२०।षष्ठश्चलः।४।२१।त्रिषुगणेषुपादःपथ्यापेचा।४।२२।विपुलान्या।४।२३।चपलाद्वि
तीयचतुर्थौगमध्येजौ।४।२४।पूर्वेमुखपूर्वा।४।२५।जघनपूर्वेतरत्र।४।२६।उभयोर्महाचपला।४।२७।अर्
द्धेसमागीतिः।४।२८।अन्त्येनोपगीतिः।४।२९।उत्क्रमेणोद्गीतिः।४।३०।अर्द्धेवसुगणआर्यागीतिः।४।३१।वै
तालीयंद्विःस्वराअयुक्पादेयुग्वसवोऽन्तेनर्गः।४।३२।औपच्छन्दसिकम्।४।३३।आपातलिकाभगौ।४।
३४।शेषेपरेणयुङ्नसाकम्।४।३५।षट्चामिश्रायुजि।४।३६।पञ्चमेनपूर्वःसाकंप्राच्यवृत्तिः।४।३७।अ
युक्तृतीयेनोदीच्यवृत्तिः।४।३८।आभ्यांयुगपत्प्रवृत्तकम्।४।३९।अयुक्चारुहासिनी।४।४०।युगपरा
न्तिका।४।४१।गानन्तर्द्विर्वसवोमात्रासमकंलनवमः।४।४२।द्वादशश्चवानवासिका।४।४३।विश्लोकःपंचमाष्टमौ
।४।४४।चित्रानवमश्च।४।४५।परयुक्तेनोपचित्रा।४।४६।एभिःपादाकुलकम्।४।४७।गान्त्याप्यालः।४।४८।

तुष्पादृषिभिः।३।२२। अनुष्टुब् गायत्रैः।३।२३। त्रिपात्क्वचिज्जागताभ्यां च।३।२४। मध्येऽन्त्ये च।३।२५। बृहती जागतस्त्रयश्च गायत्राः।३।२६। पथ्या पूर्वश्चेत्तृतीयः।३।२७। न्यङ्कुसारिणी द्वितीयः।३।२८। स्कन्धोग्रीवी क्रौष्टुकेः।३।२९। उरोबृहती यास्कस्य।३।३०। उपरिष्टाद्बृहत्यन्ते।३।३१। पुरस्ताद्बृहती पुरः।३।३२। क्वचिन्नवकाश्चत्वारः।३।३३। वैराजौ गायत्रौ च।३।३४। त्रिभिर्जागतैर्महाबृहती।३।३५। सतोबृहती ताण्डिनः।३।३६। पङ्क्तिर्जागतौ गायत्रौ च।३।३७। पूर्वौ चेदयुजौ सतःपङ्क्तिः।३।३८। विपरीतौ च।३।३९। आस्तारपङ्क्तिः परतः।३।४०। प्रस्तारपङ्क्तिः पुरतः।३।४१। विस्तारपङ्क्तिरन्तः।३।४२। संस्तारपङ्क्तिर्बहिः।३।४३। अक्षरपङ्क्तिः पञ्चकाश्चत्वारः।३।४४। द्वावप्यल्पशः।३।४५। पदपङ्क्तिः पञ्च।३।४६। चतुष्कषट्कौ त्रयश्च।३।४७। पथ्या पञ्चभिर्गायत्रैः।३।४८। जगती षड्भिः।३।४९। एकेन त्रिष्टुब्ज्योतिष्मती।३।५०। तथा जगती।३।५१। पुरस्ताज्ज्योतिः प्रथमेन।३।५२। मध्येज्योतिर्मध्यमेन।३।५३। उपरिष्टाज्ज्योतिरन्त्येन।३।५४। एकस्मिन्पञ्चके छन्दः शङ्कुमती।३।५५। षट्के ककुद्मती।३।५६। त्रिपादनिष्टमध्या पिपीलिकामध्या।३।५७। विपरीता यवमध्या।३।५८। ऊनाधिकेनैकेन निचृद्भुरिजौ।३।५९। द्वाभ्यां विराट्स्वराजौ।३।६०। आदितः सन्दिग्धे।३।६१। देवतादितश्च।३।६२। अग्निसविता सोमो बृहस्पतिर्मित्रावरुणाविन्द्रो विश्वेदेवा देवताः।३।६३। स्वराः षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादाः।३।६४। अग्निवेश्यकाश्यपगौतमाङ्गिरसभार्गवकौशिकवाशिष्ठा

छं. शा.
१

श्रीगणेशायनमः॥ ॥पिङ्गलाचार्योक्तछन्दःशास्त्रम्॥ ॥धीश्रीस्त्री म्॥१।१। वरासा य्।१।२। का गुहा र्।१।३। वसुधा स्।१।४। सा ते क्व त्।१।५। कदास ज्।१।६। किंवद भ्।१।७। नहस न्।१।८। ग्लौ।१।९। गन्ते।१।१०। ध्वादिँ रः।१।११। हे।१।१२। लौ सः।१।१३। ग्लो।१।१४। अष्टौ वसवः।१।१५। इति भट्टहलायुधकृतायां छन्दोवृत्तौ प्रथमोध्यायः॥ ॥छन्दः।२।१। गायत्री।२।२। दैव्येकम्।२।३। आसुरी पञ्चदश।२।४। प्राजापत्याष्टौ।२।५। यजुषां षट्।२।६। साम्नां द्विः।२।७। ऋचां त्रिः।२।८। द्वौ द्वौ साम्नां वर्द्धेत।२।९। त्रींस्त्रीनृचाम्।२।१०। चतुरश्चतुरः प्राजापत्यायाः।२।११। एकैकं शेषे।२।१२। जह्यादासुरी।२।१३। तान्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यः।२।१४। तिस्रस्तिस्रः सनाम्न्य एकैका ब्राह्म्यः।२।१५। प्राग्यजुषामार्ष्यः।२।१६। इति भट्टहलायुधकृतायां छन्दोवृत्तौ द्वितीयोध्यायः॥ ॥पादः।३।१। इयादिपूरणः।३।२। गायत्र्या वसवः।३।३। जगत्या आदित्याः।३।४। विराजो दिशः।३।५। त्रिष्टुभो रुद्राः।३।६। एकद्वित्रिचतुष्पादुक्तपादम्।३।७। आद्यं चतुष्पादृतुभिः।३।८। क्वचित्त्रिपादृषिभिः।३।९। सा पादनिचृत्।३।१०। षट्सप्तकयोर्मध्येऽष्टावतिपादनिचृत्।३।११। द्वौ नवकौ षट्कश्च नागी।३।१२। विपरीता वाराही।३।१३। षट्सप्तष्के वर्द्धमाना।३।१४। विपरीता प्रतिष्ठा।३।१५। तृतीयं द्विपाज्जागतगायत्राभ्याम्।३।१६। त्रिपात्त्रैष्टुभैः।३।१७। उष्णिग्गायत्रौ जागतश्च।३।१८। ककुम्मध्ये चेदन्त्यः।३।१९। पुर उष्णिक् पुरतः।३।२०। परोष्णिक् परतः।३।२१। च

प

छं. शा.
१

४२५२

पिङ्गलच्छन्दःसूत्र

श्री ५ को सरकार
वाल्मीकि संस्कृत महाविद्यालय

लुनीहि॥४९॥अद्यापिनोज्झतिहरःकिलकालकूटंकुर्मोविभर्ति
धरणींखलुपृष्ठभागे॥अम्भोनिधिर्वहतिदुःसहवाडवाग्निमङ्गीकृ
तंसुकृतिनःपरिपालयन्ति॥ ॥५०॥ ॥इतिचौरपञ्चाशि
काश्लोकाः॥अम्म॥ ॥स्यात॥ ॥सर्वदा॥श्रीशाके१७९०मासे२
पक्षे२तिथौ१०वारे१अम्म॥ ॥ ॥ ॥ ॥ ॥

४२६१

श्री ५ को सरकार
[illegible]

बौ·पं श्रीगणेशायनमः॥ ॥अद्यापितांकनकचंपकदामगौरींफुल्लारविन्दवदनांस्तनरोम
१ राजीं॥सुप्तोत्थितांमदनविह्वलसालसाङ्गीं॥विद्यांप्रमादगलितामिवचिन्तयामि॥
१॥अद्यापितांश्शात्रीँनवयौवनाढ्यांपीनस्तनींपुनरहंयदिगौरकान्तिम्॥पश्यामि
मन्मथबाणानलपीडिताङ्गींङ्गात्राणिसंप्रतिकरोमिसुशीतलानि॥२॥अद्यापि
तांयदिपुनःकमलायताक्षींपश्यामिपीवरपयोधरभारखिन्नाम्॥संपीड्यबाहु
म २ युगलेनपिबामिवक्त्रमुन्मत्तवन्मधुकरःकमलेयथेष्टम्॥३॥अद्यापितांनिधु
वनक्लमनीसहाङ्गीमापाण्डुगण्डपतितालककुन्तलालीम्॥प्रच्छन्नपा
[illegible]

राम
१

पङ्क्तमन्तरिवावहन्तीं कण्ठावलग्नमृदुबाहुलतां स्मरामि ।४। अद्यापि
तां सुरतजागरघूर्णमानतिर्यग्वलत्तरलतारकदीर्घनेत्राम् । शृंगारसारक
मलाकरराजहंसीं व्रीडाविनम्रवदनामुषसि स्मरामि ।५। अद्यापि तां यदि
पुनश्चवरायताक्षीं पश्यामि दीर्घविरहज्वलिताङ्गयष्टिम् । अङ्गैरहं समुप
गुह्य ततोऽपि गाढं नोन्मीलयामि नयने न च तां त्यजामि ।६। अद्यापि तां सुर
तताण्डसूत्रधारीं पूर्णेन्दुसुन्दरीमुखीं मदविह्वलाङ्गीम् ।। तन्वीं विशाल
जघनस्तनभारखिन्नां व्यालोलकुन्तलकलापवतीं स्मरामि ।७ ।।
अद्यापि तामसृगवन्दनपङ्कलिप्तकस्तूरिकापरिमलोत्थविसर्पिगन्धा

चौ॰ पं॰
२

मा॥ अन्योन्यवक्त्रपुटचुम्बनखञ्जरीटयुग्माभिरामनयनां श्रमये स्मरामि॥८॥ अ
द्यापि तां निधुवने मधुपानरक्तां लीलाधराङ्कृशतनुं चपलायताक्षीं॥ काश्मी
रगंधमृगनाभिकृतांगरागां कर्पूरमुखिं स्मरामि॥९॥ अद्यापि तत्कनकगौ
रकृतांगरागां प्रश्वेदविन्दुविततं वदनं प्रियायाः॥ अन्ते स्मरामि रतिखेदवि
लोलनेत्रां राहूपरागपरिमुक्तमिवेन्दुखराज्म॥१०॥ अद्यापि तन्मनसि संप
रिवर्त्तते मे रात्रौ मयि क्षुतवति क्षितिपालपुत्र्या॥ जीवेति मङ्गलवचः परिहृ
त्यकोपात्कर्णे कृतं कनकपत्रमनालकेरूपा॥११॥ अद्यापि तत्कनककु
ण्डलघृष्टगण्डमास्यं स्मरामि विपरीततराभियोगे॥ आन्दोलनश्रमज

रामः
सीता
२

लस्फुरसान्द्रबिन्दुमुक्ताफलप्रकरविच्छुरितंप्रियायाः॥१२॥अद्यापितत्प्रणय
भंगुरदृष्टिपातंतस्याःस्मरामिरतिविभ्रमगात्रभङ्गम्।वस्त्रान्तरस्खल
नवारूपयोधरान्तंदन्तछदंदशनखण्डनखण्डनम्वा॥१३॥अद्याप्य
शोकनवपल्लवरक्तहस्तांमुक्ताकलापपरिचु[illegible]म्बिततुङ्गकुचाग्रम्
॥अन्तस्थितोच्छुसितपाण्डुरगंडभीत्तिंतांवक्त्रभामलीसहंसगतिंस्मरामि
॥१४॥अद्यापितत्कनकरेणुघनोरुदेशेन्यस्तंस्मरामिनखरक्षतलक्ष्म
तस्याः॥आकृष्टहेमरुचिराम्बरमुत्थितायाल्लज्जावशात्करधृतंवगतो

व्रजन्त्याः॥१५॥अद्यापितांविधृतकुज्जलवालनेत्रांप्रोत्फुल्लपुष्पनिक
रांकुलकेशपाशम्॥सिन्दूरसंतुलितमोक्तिकहाररत्नामावर्त्तहेमकट
कांरहसिस्मरामि॥१६॥अद्यापितांगलितबन्धनकेशपाशांस्रस्तस्रजां
स्मितसुधामधराधरोष्ठीम्।पीनोन्नतस्तनयुगोपरिचारुचुम्बिमुक्ता
वलिंरहसिलोलदृशींस्मरामि॥१७॥अद्यापितांविरहवह्निनिपी
डिताङ्गींतन्वींकुरंगननांसुरतेकपात्राम्।नानाविचित्रकृतमण्ड
लमावहन्तींताराजहंसगमनांसुदतिंस्मरामि॥१८॥अद्यापितां

धवलवेस्मनिरत्नदीपमालामयूखपटलैर्दलितान्धकारे।स्वप्रोद्यमेरहसिसं
मुखदर्शनोस्यांलज्जाभयार्त्तनयनांनुचिन्तयामि॥१९॥अद्यापितांक्षितितले
वरकामिनीनांसर्वांगसुन्दरतयाप्रथमैकरेखाम्।शृंगारनाटककरोत्तम
पानपात्रींकान्तांस्मरामिकुसुमायुधवाणखिन्नाम्॥२०॥अद्यापितांस्मि
मितवमिवाङ्कुरन्तंप्रौढप्रतापमदनानलतप्तदेहाम्।बालामनाथश
रणामनुकंपनीयांप्राणाधिकांक्षणमहंनहिविस्मरामि॥२१॥अद्या
पितांप्रथमतोवरसुन्दरीणांस्नेहैकपात्रघटितानवनीन्द्रपुत्रीम्॥सोढुं

चौ०प०
४

विहेविरहजः सुकुमारगात्र्यास्तापो नत्राक्यत इति प्रतिविन्तयामि ॥२२॥ अद्या
प्यहं विहसितां कुचभारनम्रां मुक्ताकलापधवलीकृतकुराठदेशाम् । तां
केलिमंदिरतां कुसुमायुधस्य कान्तीं स्मरामि रुचिरोज्वलपुष्पकेशाम् ॥२३॥
अद्यापि वाकुःचातदुर्ललितोवितार्थं तस्यास्मरामि सुरतक्लमविह्वलायाः
॥ अव्यक्तनिःश्वसितकातरकथ्यमाने संकीर्णवर्णरुचिरं वचनं प्रिया
याः ॥२४॥ अद्यापि तां सुरतजागरमीलिताक्षीं श्लथांगयष्टिगलितांशु
भकेत्रापात्राम् । शृंगारवारिरुहकाननराजहंसीं जन्मान्तरे निधुवनेक

रामः

तु चिन्तयामि ॥२५॥ अद्यापि तां प्रणयनीं मृगशाकवाक्षीं पीयूषपूर्णकुचकुम्भ
युगं वहन्तीम् । पश्याम्यहं यदि पुनर्दिवसावसाने स्वर्गापवर्गा न च राजसुखं त्य
जामि ॥२६॥ अद्यापि विस्मयकरीं त्रिदशान्विहाय बुद्धिर्वलाच्चलति मे किम
हं करोमि । जानन्नपि मुहूर्त्तमिहान्तकाले कान्तेति वल्लभतरेति ममे
ति धीराः ॥२७॥ अद्यापि तां गमनमित्युदितं श्रुत्वैव भीरुहरिणीमिव चंच
लाक्षीम् । तां चितयामि गलदश्रुकलाकुलाक्षीं संचिन्तयामि गुरुशोक
विनम्रवक्त्राम् ॥२८॥ अद्यापि त[illegible]रागमरुहा वियोपमेयां रागे पुनर्वैकुत

चौ·पं·
५

राममभिसिक्ताम्।।मज्जीवधारणकरीमदननसदाघातादुग्भकेत्वावहरैः
सुदतींस्मरामि।।२९।।अद्यापिजातुनिपुणायततामयापिदृष्टंदृशाजगतिजा
तिविधेवधूनाम्।।सौन्दर्यनिर्जितरतिद्विजराजकान्तेकान्तामुखस्यत्वा
दृत्रांगुरोर्त।।३०।।अद्यापिराजगृहतोमयिनीयमानेदुर्वारभीषणकरै
र्यमदूतकल्पैः।।किंकिंतयाबहुविधंनकृतंमदर्थेवक्तुंनशक्यतइति
व्यथतेमनोमे।।३१।।अद्यापितांनिशिदिवाहृदयंबुनोतिपूर्णेन्दुसुन्दरमु
खंममवल्लभायाः।।लावण्यनिर्जितरतिक्षतकामदर्पंभूयःपुरःप्रतिप

रामः
५

चौ०२

ता

दृंनविलोक्यतेयत्॥३२॥अद्यापिमविहतांमनसावलेनसंचिन्तयामियु
वतीमिमजीवीताशाम्॥नान्योयभुक्तनवँनभारसागंजन्मान्तरेपिममसेवग
तिर्यथास्यात्॥३३॥अद्यापितद्वदनपंकजगंधलुब्धभ्राम्यंपितत्रमवलं
वितगण्डयुग्मम्॥लीलावधूतकरपल्लवकंकणांक्वाणोपिमूर्छि
तमनः सुरतांगपीडा॥३४॥अद्यापिसानखपदंस्तनमण्डलेयद्दत्तंम
यास्यमधुपानविमोहितेन॥उद्भिन्नरोमपुलकैर्वहुभिः प्रयत्नाज्जाग
र्तिरक्षतिविलोकयतिस्मरामि॥३५॥अद्यापिकोपविमुखीकृतगं

चौ॰पं॰
६

तुकामानोक्तंववक्षप्रतिददाति यद्देवदर्वन्मा।तुंवांगिरोदितिमन्त्रंपतितोऽ
स्मिपाद्दासस्तवप्रियतमेभजमास्मामि॥३६॥अद्यापिधावतिमनःकि
महंकरोमिसार्द्धंसखीभिरतिवासगृहेषुकान्तो।कान्ताप्रुगोतपरिह
सविचित्रनृत्येक्रीडाभिरामइतिपातुमदीयकालः॥३७॥अद्याप्य
हंनखलुवेद्मिकिमीश्वरपत्नीशापंगतासुरपतेरथकृष्णलक्ष्मी।
धात्रैवकिंत्रिमगतःपरिमोहनायसानिर्मितायुवतिरत्नदिदृक्ष
यावा॥३८॥अद्यापितांयदिवर्णापितुनकश्चित्कोह्यदयसदृ

राम॰
६

नींच परिग्रहं मे॥ दृष्टं द्वयोः सदृशयोः खलु येन रूपं श्रीको भवेद्यदि वास्यवप
रतु नान्यता॥३९॥ अद्यापि तां नयनकज्जलमिश्रोविभ्रुविश्रान्तकर्णयुगलं
धत्तीं विसृस्राम्॥ कान्तां स्मरामि घनपीनपयोधराढ्यां श्यामासमैतेवा
गुणगौरवशोभमानाम्॥४०॥ अद्यापि निर्मलशरच्छविगौरकान्तीं चेतो मुनेरपि ह
रेत्किमुतास्मदीयम्॥ वक्त्रं सुधारससमयं दितनस्य पयेचुम्बाम्यहं विरहो व्यथ
ते मनो मे॥४१॥ अद्यापि तत्कनकरेपुसुगंधिवक्त्रं तत्प्रेम वारि मकरध्वज
तापकौरि॥ प्राप्नोम्यहं यदिपुनः सुरतैकतीर्थं प्राणस्त्यजामि नियतं तद

वाप्तिहेतोः॥४२॥अद्याप्यहोजगतिसुन्दरलक्षपूर्णोवान्योन्यपीवरगुणा
धिकसंप्रपन्नो।अन्याभिरप्युपमितुंनयावद्वाक्यंरूपंतदीयमितिमेहृद
येविषादः॥४३॥अद्यापिसानवयौवनसुन्दराङ्गीरोमाञ्चवीचिविलस
[illegible]पल्लाङ्गयष्टिः।मत्स्वान्तसारसबलहृदहोत्रकंपात्किन्चि[illegible]मंप्रथ
यतिप्रियराजहंसि।४४।अद्यापितांनृपतिशेखरराजपुत्रींसंपूर्णयौ
वनमदालसघूर्णनेत्राम्।गन्धर्वयक्षसुरकिन्नरराजकन्यास्तान्नभो
निपतितामिवचिन्तयामि।४५।अद्यापितांपुरायतींकृशांवेदमध्यामु
[illegible]संभृतसुधारसकुम्भयुग्माम्।नानाविचित्रकृतमण्डनमारि

ताङ्गीं सुप्तोत्थितां निशि दिवा न हि विस्मरामि।४६।।अद्यापि तां कनका
न्ति ध्वतालसांगीं व्रीडोत्सुकां मदनभीतिविकंपमानाम्।अङ्गाङ्ग सङ्ग
परिचुम्बनजातमोहां मज्जीवनौषधिमिव प्रमदां स्मरामि।४७।।अद्या
पि तत्सुरतकेलिनिरस्त्रयुद्धं बन्धोपबंधपवनोत्थितशून्यहस्तम्।स
न्तोष्ठपीडननखक्षतरक्तसिक्तं तस्याः स्मरामि रतिबन्धुरनिष्ठुरत्व
म्।४८।।अद्याप्यहं वरवपुःसुरतोभोगं जीवामि नो न्यविनाक्षराम
न्तरेण।तद्भ्रातमेमरणवाहिदुःखशान्त्यै विज्ञापयामि भवतस्त्वरितं

ल्लुनीति॥४९॥अद्यापिनोज्झतिहरःकिलकालकूटंकुर्मोबिभर्ति
धरणींखलुपृष्ठभागे॥अम्भोनिधिर्वहतिदुःसहवाडवाग्निमङ्गीकृ
तंसुकृतिनःपरिपालयन्ति॥ ॥५०॥ ॥इतिचौरपञ्चाशि
काश्लोकाः॥ॐम्॥ ॥ःस्यात॥ ॥सर्वदा॥श्रीशाके१७९०मासे२
पक्षे२तिथौ१०वारे१ॐम्॥ ॥ ॥ ॥ ॥ ॥

पु २६०

श्री ५ को सरकार
संस्कृत [illegible]

छन्दोमञ्जरी

श्रीगणेशाय नमः

प्रथमस्तबकः

देवं प्रणम्य गोपालं वैद्यगोपालदासजः ।
सन्तोषातनयश्छन्दो गङ्गादासस्तनोत्यद ॥
सन्ति यद्यपि भूयांसश्छन्दोग्रन्था मनीषिणाम् ॥
तथापि सारमाकृष्य नवकार्थो ममोद्यमः ॥
इयमच्युतलीलाढ्या सद्वृत्ताजातिशालिनी ॥
छन्दसां मञ्जरी कान्ता सम्यक्कण्ठे लगिष्यति ॥
पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ।
सममर्द्धसमं वृत्तं विषमं चेति तत्त्रिधा ॥
समं समचतुष्पादं भवत्यर्द्धसमं पुनः ॥
आदिस्तृतीयवद्यस्य पादस्तुर्यो द्वितीयवत्
भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम् ।

म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ॥
समस्तंवाङ्मयंव्याप्तंत्रैलोक्यमिवविष्णुनाः।

मस्त्रिगुरुस्त्रिलघुश्चनकारो
भादिगुरुःपुनरादिलघुर्यः ॥
जोगुरुमध्यगतोरलमध्यः
सोऽन्तगुरुःकथितोऽन्तलघुस्तः॥

गुरुरेकोगकारस्तुलकारोलघुरेककः ॥
क्रमेणचैषांरेखाभिःसंस्थानंदर्श्यतेयथा।

म ऽऽऽ, न ।।।, भ ऽ।।, य ।ऽऽ, ज ।ऽ।
र ऽ।ऽ, स ।।ऽ, त ऽऽ।, ग ऽ, ल ।, ॥

ज्ञेयासर्वान्तमध्यादिगुरवोऽत्रचतुष्कलाः।
गणाश्चतुर्लघूपेताःपञ्चार्यादिषुसंस्थिताः॥

यथा(ऽऽ)(।।ऽ)(।ऽ।)(ऽ।।)(।।।।)

सानुस्वारश्चदीर्घश्चविसर्गीचगुरुर्भवेत्।
वर्णःसंयोगपूर्वश्चतथापादान्तगोऽपिवा॥

अत्रपादांतगोलघुर्गुरुर्भवेद्वा।यथा।तरुणं
सर्षपशाकंनवौदनंपिच्छिलानिचदधीनि।

अल्पव्ययेन सुंदरि ग्राम्यजनो मिष्टमश्नाति सुंदरीति । ग्राम्यशब्दे परे विकल्पेन लघुत्वं तथा भट्टिः । अथ लुलितपतत्रिमालं रुण णाञ्जनवाणकेसरतमालं । सवनं द्विविक्रमालं सीतां द्रष्टुं जगामालम् । अत्र प्रथमपादान्तगुरोर्लघुत्वम् । तथा सत्यितुः पारिजातहरणनाटके ॥ सिंदूरप्रकरगौरिकरागशोभे शाम्बन्मदस्रवणनिर्झरवारिपूरे । संग्रामभूमिगतमत्तसुरेभकुम्भकूटे मदीयनखराशनयो विशन्तु ॥ अत्र तृतीयचतुर्थपादांतलघ्वोर्गुरुत्वम् । तथा ममाच्युतवीरतेऽपि ॥ केनं केशिदशनक्षतसम्भवे नरेजे समंडितत रोहीरवानुदराङ्गः । नहंतसंदलितभीमभुजप्रतापवह्निरिव स्फुटकणप्रकोणकीर्णः ॥ अत्र तृतीयप्रथमपादान्तस्यापि लघोर्गुरुत्वम् ।

प्रह्वेवेतिपुनःपिङ्गलमुनेर्विकल्पविधायकंसूत्रम्। तत्रचकुमारे। सामंगलस्नानविशुद्धगात्रीगृहीतप्रत्युद्गमनीयवस्त्रा। निर्वृत्तपर्जन्यजलाभिषेका। प्रफुल्लकाशावसुधेवरेजे। अत्रप्रशब्देपरेगुरोर्लघुत्वम्। प्राप्तनाभिह्रदमज्जनमाशुप्रस्थितंनिवसनंग्रहणाय। औपनीविकमरुन्धकिलस्त्रीवल्लभस्यकरमात्मकराभ्याम्। इतिमाघे। अत्रह्रशब्देपरेगुरोर्लघुत्वम्। तीव्रप्रयत्नोच्चारणेनात्रलघुत्वमितिकण्ठाभरणः।

यदुक्तम्

यदातीव्रप्रयत्नेनसंयोगादेरगौरवम्।
नच्छन्दोभंगइत्याहुस्तदादोषायसूरयः॥

यतिर्जिह्वेष्टविश्रामस्थानंकविभिरुच्यते। साविच्छेदविरामाद्यैःपदैर्वाच्या

निजेच्छया॥ कश्चिच्छंदस्यास्तेयतिरभिहिता पूर्वं कृतिभिः पश्चात्ते मार्गाभ्यां व्रजतियदमध्ये त्यजति च। पुनस्तैर्वासैत्वराविहितसन्धिः अयमिति तां यथा कृष्णः पुष्णात्वतुलमहिमामांकरुणया।

अयं च श्लोकश्छंदोगोविंदे मम गुरोर्गंगादासस्य। श्वेतमाराध्यमुख्यास्तुनेकंतिसुनयोयातिम। इत्याहभट्टः। स्वग्रंथे गुरुर्मे पुरुषोत्तमः। अतएवमुरारिः। संतुष्टेतिमन्तांपुरामपिरिपोःकराग्रलदोर्मण्डलीलीलालूनपुनर्विरूढशिरसो वीरस्य लिप्सोर्वरम्। याच्ञादैन्यपराञ्चि यस्य कलहायन्ते मिथस्त्वं वृणु त्वं वृणुवित्यभितो मुखानि स दशग्रीवः कथं कथ्यतामिति। जयदेवोऽपि। साध्वी माध्वीकचिन्ता न भवति पीरतः शर्करे कर्कशासि द्राक्षे द्रक्ष्यंति के त्वाममृत मृतम

म्मिश्रीरत्नीरंसस्नेमाकंदकन्दकोंताधरध
रणितलंगस्कुयस्कृतियावज्जावंश्रृंगा
रशारस्वतमयजयदेवस्यविश्वरववां
मि॥ एवमन्येऽपि। कत्यद्रिप्रतिरोधिताः
कतिनदीपाथोनिधिप्लाविताः कत्येवा
टवितांगताः कतिनवाभूदेवदेवैर्धृताः॥
भूम्यो भूमिपतीन्दुनायकयशःप्रस्तावना
मयुलीकेलीकृत्स्यजगज्जनंकतिवराः
धीभिर्गुइंपास्यतीति॥

आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्द्धितैः।
पादैरुक्थादिसंसंस्याच्छन्दःषड्विंशतिंगतम्
उक्थात्युक्थातथामध्याप्रतिष्ठान्यासुपूर्विका
गायत्र्युष्णिगनुष्टुप्चबृहतीपङ्क्तिरेवच।
त्रिष्टुप्चजगतीचैवतथातिजगतीमता।
शक्वरीसातिपूर्वास्यादष्ट्यत्यष्टीतथास्मृते।
धृतिश्चातिधृतिश्चैवकृतिःप्रकृतिराकृतिः।
विकृतिःसंकृतिश्चैवतथातिकृतिरुत्कृतिः।
इत्युक्ताश्छन्दसांसंज्ञाःक्रमशोवच्मिसाम्प्रतम्॥
इतिछन्दोमञ्जर्यांगुरवव्धाख्यःप्रथमःस्तवकः।

द्वितीयःस्तवकः।

अथसमवृत्तम्।

उक्था (२)

(एकाक्षरावृत्तिः

१।ग्श्री।

श्रीस्तेसास्ताम्

अत्युक्था (४)

(द्व्यक्षरावृत्तिः।)

१।गौस्त्री।

गोपस्त्रीभिःकृष्णोरेमे

मध्या।(८)

(त्र्यक्षरावृत्तिः)

१।मोनारी।

गोपानांनारीभिः। स्मेरोऽव्यात्कृष्णोवः॥

२। रो मृगी।

स्मा मृगीलोचनाः। राधिकाश्रीपतेः॥

प्रतिष्ठा। (१६)

(चतुरक्षरावृत्तिः)

१। ग्मौ चेत्कन्या॥

भास्वत्कन्या सैका धन्या। यस्याः कूले कृष्णोऽखेलत्॥

२। नगि सती॥

मुररिपोः नवपदम्। नमति सानतु सती

सुप्रतिष्ठा। (३२)

(पञ्चाक्षरावृत्तिः)

१। भ्गौ गिति पङ्क्तिः॥

कृष्णसनाथा तर्णकपङ्क्तिः॥

यामुनकच्छे चारु चचार॥

२। सलगैः प्रिया॥

व्रजसुभुवो विलसत्कलाः।

अभवन्प्रिया मुरवैरिणः॥

गायत्री। (६४)

(षडक्षरावृत्तिः)

१। त्यौ चेत्तनुमध्या॥

मूर्त्तिर्मुरशत्रोरत्यद्भुतरूपा।
आस्तां मम चित्ते नित्यं तनुमध्या॥

नऽयं पतिरस्त्रो हृन्तानिकपीडः। हारिणयबलानां हारिणयबलानाम्। इति भट्टो। पाठान्तरेण हस्त्री· इत्यत्र गुरुत्वम्॥

२। शशिवदनान्यौ॥

शशिवदनानां व्रजतरुणीनाम्।
अधरसुधोर्मिर्मधुरिपुरैच्छत्॥

२। द्वियासोमराजी॥

हरे। सोमराजीसमा ते यशः श्रीः।
जगन्मण्डलस्याच्छिनत्त्यन्धकारम्।

उष्णिक्। (१२८)

(सप्ताक्षरावृत्तिः)

१। ननगि मधुमती॥

रविदुहितृतटे नवकुसुमततिः।
व्यधित मधुमती मधुमथनमुदम्॥

२। कुमारललिताज्स्गाः ॥
मुरारितनुवल्लीकुमारललिता सा।
व्रजैणनयनानांततानन्दसुधैः ॥
३। मभ्गौस्यान्मदलेखा ॥
रक्तैवाङ्कुविकस्राणाह्न्नीज्ञान्मदलेखा।
लग्नाभून्मुरशत्रौकस्तूरीरसचर्चा ॥

—

अनुष्टुप् ॥ (२५६)
(अष्टाक्षरावृत्तिः)
१। चित्रपदा यदि भौ गौ ॥
पाकुनखैकतदेशोगोपवधूजलकेलौ।
कंसरिपोर्गतिलीलाचित्रपदाजगदव्यात्।
२। भात्तलगामाणवकम् ॥
चञ्चलचूडंचपलैर्वत्सकुलैःकेलिपरम्।
ध्यायसखे।स्मेरमुखंनंदसुतंमाणवकम् ॥
मोमोगोगोविद्युन्माला ॥
वासोवल्लीविद्युन्मालाबर्हश्रेणीशाक्रश्चापः।
यस्मिन्नास्तांतापोच्छित्त्यैगोमध्यस्थःकृष्णाम्भोदः॥

४। ग्लौरजौ समानिका तु॥
यस्यकृष्णपादपद्ममस्तिहृत्तडागसद्म
धीःसमानिकापरेणनोचितात्रमत्सरेण॥

५। प्रमाणिकाजरौलगौ॥
पुनातुभक्तिरच्युतासदाच्युतांघ्रिपद्मयोः।
श्रुतिस्मृतिप्रमाणिकाभवांबुराशितारिका॥
मतल्लिकामचर्चिकेत्यमरकोषः॥

६। नभलगागजगतिः॥
रविसुतापरिसरेविहरतोदृशिहरेः।
व्रजवधूगजगतिर्मुदमलंव्यतनुत॥
अवतुवोगिरिसुताशशिभृतःप्रियतमा।
वसतुमेहृदिसदाभगवतःपदयुगम्॥
इतिकस्यापि।

बृहती॥(५१२)

(नवाक्षरावृत्तिः)

१। भुजगशिशुभृतानौमः॥
स्फुटतटनिकटश्रोणीभुजगशिशुभृतायासीत्।
मुररिपुदलितेनागेव्रजजनसुखदासाभूत्॥
सृतेत्येवंशंभुप्रभृतिषुपाठःसृतेत्येवमाधुनिकाःपठन्ति।

२। स्यान्मणिमध्यं चेद्भमसाः ॥
कालियभोगाभोगगतस्तन्मणिमध्यस्फीतरुचा।
चित्रपदाभोनन्दसुतश्चारुननर्त स्मेरमुखः ॥

३। ननमैर्भुजगशिशुसृताः ॥
नवलानंगालिंगितैर्यमुनाभुजगशिशुसृता।
कथमेनिवकस्त्वाकश्चपलः सदैवतां हरिः ॥

पङ्क्तिः। (१०२४)
(दशाक्षरावृत्तिः)

१। रुक्मवती सा यत्र भमस्गाः ॥
कायमनोवाक्यैः परिशुद्धैर्यस्य सदा कंसद्विषि भक्तिः।
तस्य यदीह स्याल्लिरुदारा रुक्मवती विघ्नः खलु तस्य ॥
रूपवतीयं क्वचित्क्वचित्तच्चम्पकमाला च ॥

२। ज्ञेया मत्ता मभसगयुक्ता ॥
पीत्वा मत्ता मधु मधुपाली कालिन्दीये तटवनकुञ्जे।
उद्दीव्यन्तीर्व्रजजनरामाः कामासक्ता मधुजिति चक्रे ॥

३। त्वरितगतिश्च नजनगैः ॥
त्वरितगतिर्व्रजयुवतिस्तरणिसुताविपिनगता।
सुररिपुणा रतिगुरुणा परिरमिता प्रमदमिता ॥

क्षितिविजितिस्थितिविहृतिव्रतरतयः परगतयः ।
उरुरुधुर्गुरुदुधुवुर्युधिकुरवः स्वमरिकुलम् ॥
इति दण्डिनि ॥

४ । नरजगैर्भवेन्मनोरमा ॥
तरणिजातटे विहारिणी व्रजविलासिनी विलासतः ।
मुरारिपोस्तनुः पुनातु वः सुकृतशालिनां मनोरमा ॥

त्रिष्टुप्छंद । (२०४८)
(एकादशाक्षरावृत्तिर्यथा)

१ । स्यादिन्द्रवज्रा यदि तौ जगौ गः ॥
गोष्ठे गिरिं सव्यकरेण धृत्वा ॥
रुष्टेन्द्रवज्राहतिमुक्तवृष्टौ ॥
यो गोकुलं गोपकुलं च सुस्थं ।
चक्रे स नो रक्षतु चक्रपाणिः ॥
२ । उपेन्द्रवज्रा प्रथमे लघौ सा ।
उपेन्द्रवज्रादिमणिच्छटाभिः ।
विभूषणानां छुरितं वपुस्ते ।
स्मरामि गोपीभिरुपास्यमानं
सुरद्रुमूले मणिमण्डपस्थम् ॥

२। । अनन्तरोदीरितलक्ष्मभाजौ
पादौयदीयावुपजातयस्ताः॥
इत्थंकिलान्यास्वपिमिश्रितासु
वदन्तिजातिष्विदमेवनाम॥(१४भेदः)

सभेदाच्युतवीतियथा;—
कालिन्दुरारेवदनारविन्दं
संक्रान्तमालोक्यजलेनवोढा।
व्यक्तंसलज्जापरिचुम्बितंतत्
तदर्थमेवाम्भसिनिर्ममज्ज॥
मुखारविन्दैर्व्रजसुन्दरीणाम
आमोदमत्युत्कटमुत्किरद्भिः।
अहर्निशंचिन्तेनसमंमुरारे
र्हैमाम्बुजेभ्योऽपिमधुव्रतौघः॥
नीरेषुतस्याःप्रतिबिम्बितासु
व्रजाङ्गनानांनयनावलीषु।
स्वबंधुपङ्क्तिभ्रमतोऽतिमुग्धा
गोष्ठींशफर्यौरचयाम्बभूवुः॥

तथासमेवगोपालशतके:-
वनेषुकृत्वासुरभिप्रचारं
प्रकाममुग्धामधुवासरेषु।

गायन्कलंक्रीडतिपद्मिनीषु
मधूनिपीत्वामधुसूदनोसौ॥

एवमनयोर्नानाविधाश्चउपजातयोवोद्धव्याः।
तथावंशस्थविलेन्द्रवंशयोरित्थमुदाहार्यम्॥

इत्थंरथाश्वेभनिषादिनांप्रगे
गणोनृपाणामथतोरणाद्बहिः।
प्रस्थानकालक्षमवेशकल्पना
कृतक्षणक्षेपमुदैक्षताच्युतम्।इतिमाघे।

४। नजजलगैर्गदितासुमुखी।
तरणिसुतातटकुंजगृहेवदनविधुस्मितदीधितिभिः।
तिमिरमुदस्यमुखंसुमुखीहरिमवलोकयतुत्वचिरम्॥

५। मात्तौगौचेच्छालिनीवेदलोकैः॥
अंहोहन्तिज्ञानवृद्धिंविधत्ते
धर्मंदत्तेकाममर्थंचसूते।
मुक्तिंदत्तेसर्वदोपास्यमाना
पुंसांश्रद्धाशालिनीविष्णुभक्तिः।
वातोर्मीयंगदिताम्भौतगौगः॥
ध्यातामूर्त्तिःक्षणमप्यच्युतस्य
श्रेणीनाम्नांगदिताहेलयापि।

संसारेऽस्मिन्दुरितंहन्तिपुंसां
दानेम्भीपोतमिवाम्भोधिमध्ये॥

७। मोगोनौगोभ्रमरविलसिता
भ्रमरविलसितंक्वापि॥

मुग्धे।मानंपरिहरनचिरात्
तारुण्यन्तेसफलयतुहरिः।
फुल्लावल्लीभ्रमरविलसिता
भावेशोभांकलयतिकिमुताम्॥

८। स्यादनुकूलाभतनगगाश्चेत्॥
वल्लवेषामुररिपुमूर्तिर्गोपमृगाक्षीकृतरतिपूर्तिः।
वाञ्छितसिद्ध्यैप्रणतिपरस्यस्यादनुकूलाजगतिनकस्य॥

९। रान्नरैर्लगैरथोद्धता॥
राधिकादधिविलोडनस्थिता
कृष्णवेणुनिनदैरथोद्धता।
यामुनंतटनिकुंजमंजसा
साजगामसलिलाहृतिच्छलात्॥

१०। स्वागतारनभगैर्गुरुणाच॥
यस्यचेतसिसदासुरवैरीवल्लवीजनविलाससलोलः।
तस्यनूनममरालयभाजःस्वागतादरकराःसुरराजः॥

११। दोधकमिच्छति भत्रितयाद्गौ ॥
देव। सदोधकदम्बतलस्थ श्रीधर तावकनामपदं मे।
कण्ठतलेस्तु विनिर्गमकाले स्खलमपि स्मरणेप्यनियोगे।
१२। स्यान्मोटनकं तजजाश्च लगौ ॥
रंगे खलु मल्लकलाकुशलञ्चाणूरमहाभटमोटनकम्
यः केलिलवेन चकार स मे संसारगुरुंपी मोटयतु ॥
१३। इपेन्दुरीरिता रजौ रलौ गुरुः ॥
यस्य कीर्त्तिरिन्दुकुन्दवृन्दसुन्दरेप्यशेषलोकपावनी सदा।
जाह्नवीव विश्ववन्द्यविक्रमा तं भजामि भावगम्यमच्युतम् ॥

जगती। (४०९६)

(द्वादशाक्षरावृत्तिः)

१। चन्द्रवर्त्म निगदन्ति रनभसैः ॥
चन्द्रवर्त्म पिहितं घनतिमिरै-
राजवर्त्म रहितं जनगमनैः।
इष्टवर्त्म तदलंकुरु सरसे
कुञ्जवर्त्मनि हरिस्तव कुतुकी ॥
२। वदन्ति वंशस्थविलं जतौ जरौ ॥
विलासवंशस्थविलं मुखानिलैः
प्रपूर्य्य यः पञ्चमरागमुद्गिरन् ॥

व्रजाङ्गनानामपिगानशालिनां (१)
जहारमानंसहरिःपुनातुनः ॥
वंशस्तनितमितिक्वापि·।
३। तच्चेन्द्रवंशाप्रथमाक्षरेगुरौ·॥
दैत्येन्द्रवंशाग्निरुदीर्णदीधितिः
पीताम्बरोऽसौजगतांतमोपहः ॥
यस्मिन्नमज्जुःशलभाइवस्वयम्
तेकंसचाणूरमुखामखद्विषः॥
४। जसौजसयुतौजलोद्धतगतिः।
यदीयहलतोविलोक्यविपदं
कलिन्दतनयाजलोद्धतगतिः।
विलासविपिनंविवेशसहसा·
करोतुकुशलंहलीसजगताम्·॥
सनाकवनितंनितम्बरुचिरं
चिरंसुनिनदैर्नदैर्वृतममुम्·॥
मताफलवतोऽवतोरसपरा
परास्तवसुधासुधाधिवसति·॥इतिभारवेः·॥
५। भुजङ्गप्रयातंचतुर्भिर्यकारैः।
(१) नारदतुम्बरादीनाम्।

सदारात्मजज्ञातिभृत्यो विहाय
स्वमेतं दृढं जीवनं लिप्समानः ।
मयादेशितः कालियेत्थं कुरु त्वं
भुजंगप्रयातं द्रुतं सागराय ॥
६। वद तोटकमब्धिसकारयुतम् ॥
यमुनातटमच्युतकेलिकला
लसदंघ्रिसरोरुहसङ्गरुचिः ।
मुदितोऽटकलेरपनेतु मघं
यदि चेच्छसि जन्म निजं सफलं ॥
७। कीर्त्तितैषा चतूरेफिका स्रग्विणी ॥
इन्द्रलीनोपलीनेव या निर्मिता
शातकुंभद्रवालङ्कृता शोभते
नव्यमेघच्छविः पीतवासा हरे
र्मूर्तिरास्तां जयायोरसि स्रग्विणी ॥
८। वाणाश्वैश्छिन्ना वैश्वदेवी ममौ यौ ॥
अर्चामन्येषां त्वं विहायामराणा
मद्वैतेनैकं विष्णुमभ्यर्च भक्त्या ।
तत्राशेषात्मन्यर्चिते भाविनी ते
भ्रातः सम्पन्नाराधना वैश्वदेवी ॥

९। प्रमिताक्षरासजससैःकथिता॥
अमृतस्यशीकरमिवाक्षरति
रदमौक्तिकांशुलहरीस्फुरिता।
प्रमिताक्षरामुररिपोर्भणिति
र्जनस्तुभुवामधिजहारमनः॥
प्रतिकूलतामुपगतेहिविधौ
विफलत्वमेतिबहुसाधनता।
अवलम्बनायदिनभर्तुरभू
न्नपतिष्यतःकरसहस्रमपि॥इतिमाघे॥
१०। द्रुतविलम्बितमाहनभौभरौ॥
तरणिजापुलिनेनववल्लवी
परिषदासहकेलिकुतूहलात्॥
द्रुतविलम्बितचारुविहारिणं
हरिमहंहृदयेनसदावहे॥
११। ननररघटितातुमंदाकिनी॥
वलिदमनविधौबभौसङ्गता
पदजलरुहियस्यमन्दाकिनी।
सुरनिहितसिताम्बुजस्रग्निभा
हरतुजगदघंसपीताम्बरः॥

सहशरधिनिजंतथाकार्मुकं
वपुरतनुतथैवसंवर्मितम्।
निहितमपितथैवपश्यन्नसिं
वृषभगतिरुपाययौसविस्मयम्॥इतिभारवौ॥
अतिसुरभिरभाजिपुष्पश्रिया
मतनुतरतयेवसन्तानकः॥
तरुणापरभृतःस्वनंरागिणा
मतनुतरतयेवसन्तानकः॥इतिमाघे॥

१२। नयसीहितौन्यौकुसुमविचित्रा
विपिनविहारेकुसुमविचित्रा।
कुतुकितगोपीमहितचरित्रा
मुररिपुमूर्त्तिर्मुखरितवंशा
चिरमवताद्वत्सलवतंसा॥

१३। इहवदतामरसंनजजायः।
स्फुटसुखमामकरन्दमनोज्ञं
व्रजललनानयनालिनिपीतम्।
तवमुखतामरसंमुरशत्रो।
हृदयतडागविकाशिममास्तु॥

१४। भवतिनजावथमालतीजरौ।

इहकलयाच्युतकेलिकानने·
मधुरससौरभसारलोलुपः।
कुसुमकृतस्मितचारुविभ्रमा·
मलिरपिचुम्बतिमालतींमुहुः॥
यमुनाक्वापि·॥
अपिविजहीहिदृढोपगूहनं
त्यजनवसङ्गमभीरुवल्लभम्·।
अरुणकरोद्गमएषवर्त्तते
वरतनुसंप्रवदन्तिकुक्कुटाः।इतिभारवौ·॥
१५। त्यौत्यौमणिमालाछिन्नागुहवक्त्रैः॥
प्रह्वामरमौलौरत्नोपलक्लृप्ते·
जातप्रतिबिम्बाशोणामणिमाला·।
गोविंदपदाब्जेराजीनखराणा·
आस्तांममचित्तेध्वान्तंशमयन्ती॥
१६। मोभःस्मौचेज्जलधरमालाब्ध्यन्तैः॥
याभक्तानांकलिदुरितोत्तप्तानां
तापच्छेदेजलधरमालानव्या·।
भव्याकारादिनकरपुत्रीकूले·
केलीलोलाहरितनुरव्यात्सावः॥

अतिजगती ॥ (८१९२)

(त्रयोदशाक्षरावृत्तिः)

१। आशाभिर्मनजरगाःप्रहर्षिणीयम् ॥
गोपीनामधरसुधारसस्यपानै
रुत्तुङ्गस्तनकलसोपगूहनैश्च ।
आश्चर्यैरपिरतिविभ्रमैर्मुरारेः
संसारेमतिरभवत्प्रहर्षिणीयम् ॥

२। जभौसजौगितिरुचिराचतुर्ग्रहैः ॥
पुनातुवोहरिरतिरासविभ्रमो
परिभ्रमन्व्रजरुचिराङ्गनान्तरे ।
समीरणोच्छ्वसितलतान्तरालगो
यथामरुत्तरलतमालभूरुहः ॥
अभून्नृपोविबुधसखःपरन्तपः
श्रुतान्वितोदशरथइत्युदाहृतः ॥
गुणैर्वरंभुवनहितच्छलेनयं
सनातनःपितरमुपागमत्स्वयम् ॥ इतिभट्टौ ॥

३। वेदैरन्ध्रैर्मत्तौयसगामत्तमयूरः ॥
लीलानृत्यन्मत्तमयूरध्वनिकान्तं
नृत्यन्नीपामोदिपयोदानिलरम्यम् ।

रासक्रीडाकुतुकमनागोपवधूभिः
कंसध्वंसीनिर्जनवृंदावनमाप॥
ज्ञातानेनिष्क्रान्तिमाकर्ण्यविषण्णा
स्तस्यान्विष्यन्वेतसगूढंप्रभवंसः।
शल्यप्रोतंवीक्ष्यसकुम्भंमुनिपुत्रं
नापादन्तःशल्यइवासीत्क्षितिऽपोपि॥
इतिरथौ ॥

४। नयुगलसयुगलगैरितिचरणी॥
जयतिविहितनारिपुनाशवलीला
कुपितकवलकरकालियमौलौ।
चरणकमलयुगचापलचण्डी
पदनखरुचिविजितभोगमणिश्रीः॥

५। सजसाजगौचयदिमञ्जुभाषिणी॥
भ्रमतोभिशीतलकरेमलालयं
स्तनुकान्तिरोचितविलोचनोहरे।
नियतंकलानिधिरसीतिवल्लवीः
मुदमच्युतेव्यधितमञ्जुभाषिणी॥
सुनन्दिनीतिशम्भोः॥

६। ननततगुरुभिश्चन्द्रिकाऽश्वर्त्तुभिः॥

शारदमृतरुचश्चन्द्रिकाक्षालिते
दिनकरतनयातीरदेशेहरिः ।
विहरतिरभसाद्वल्लवीभिःसमं
त्रिदिवयुवतिभिःकोऽपिदेवोयथा॥
इहदुरधिगमैःकिञ्चिदेवागमैः
सततमसुतरंवर्णयन्त्यन्तरम्।
अमुमतिविपिनंवेददिग्व्यापिनं
पुरुषमिवपरस्यपद्मयोनिःपरम्॥
इतिभारवौ॥उत्पलिनीतिकेचित्॥
७। सजसाःसगौचकथितःकलहंसः॥
यमुनाविहारकुतुकेकलहंसो
व्रजकामिनीकमलिनीकृतकेलिः।
जनचित्तहारिकलकण्ठनिनादः
प्रमदंतनोतुतवनन्दतनूजः॥
सिंहनादकापि॥
८ सजसाजगौचभवतिप्रबोधिता॥(१)
शयितामपाचटुलसाननिद्रया
रतिकेलिकुञ्जनिलयेविलासिनी।
(१) मञ्जुभाषिणीप्रबोधितयोरेकलक्षणात्वात्।
पृथकवचनमुदाहरणान्तरदानंचप्रामादिकम्।

मुरवैरिणावदनचुम्बनादिना
स्मितमाततानसपदिप्रबोधिता।
९। भवतिमृगेन्द्रमुखंनजीर्णरोगः॥
गुरुभुजवीर्यभरंहरिंमदान्धाः
युधिसमुपेत्यनदानवाजिजीवुः।
क्षुधितमृगेन्द्रमुखंमृगाउपेत्य
क्वनुखलुबिभ्रतिजीवनस्ययोगम्॥

शार्क्करी। (१६३८४)
(चतुर्दशाक्षरावृत्तिः)

१। मोगोगोनौमःशररावभिरसम्बाधा॥
वीर्याग्नौयेनज्वलतिरणावशात्सिक्ते
दैत्येन्द्रैर्जाताधरणिरियमसम्बाधा।
धर्मस्थित्यर्थप्रकटिततनुसम्बन्धः
साधूनोवाधांप्रशमयतुसकंसारिः॥
२। ज्ञेयंवसन्ततिलकंतभजाजगौगः॥
फुल्लंवसन्ततिलकंतिलकंवनाल्या
लीलापरंपिककुलंकलमत्ररौति।
वात्येषपुष्पसुरभिर्मलयाद्रिवातो
यातोहरिःसमधुरांविधिनाहताःस्मः॥

सिंहोन्नताक्वापि ॥

३। ननरसलघुगैःस्वरैरपराजिता ॥
पदनवधिभुजप्रतापकृतास्पदा
यदुनिचयचमूःपरैरपराजिता ।
व्रजयतसमरेसमस्तरिपुव्रजं
सजयतिजगतांगतिर्गरुडध्वजः ॥

४। ननभनलगितिप्रहरणकलिका ॥
व्यथयतिकुसुमप्रहरणकलिका
प्रमदवनभवातवधनुषिनता ।
विरहविपदिमेशरणमिहततो
मधुमथनगुणस्मरणमविरतम् ॥

५। मात्तोनोमोगौयदिगदितावासन्तीयम् ॥
भ्राम्यद्भृङ्गीनिर्भरमधुरालापोद्गीतैः
श्रीखण्डाद्रेरङ्गनपवनैर्मन्दान्दोला
लीलालोलापह्लवविलसद्वल्लीहासैः
कंसारातौन्नृत्यतिसहृद्यैवावासन्तीयम् ॥

६। द्विःसप्तच्छिद्लोलाम्सौम्भौगौचरणेचेत् ॥
मुग्धे । यौवनलक्ष्मीर्विद्युद्विभ्रमलोला
त्रैलोक्याद्भुतरूपोगोविन्दोऽतिदुरापः ।

तद्वृन्दावनकुञ्जगुञ्जद्भृङ्गसनाथे
श्रीनाथेनसमेतास्वच्छन्दंकुरुकेलिम्॥
८। स्वरभिदियदिनोनोवनान्तर्मुखीगो
सरसखगकुलालापनान्दीमुखीयं
लहरिभुजलयावारफेनस्मितश्रीः।
मुरहर।कलयासन्तिमासाद्यकिन्ते
प्रमुदितहृदयाभानुजानृत्यतीह ॥
श्रीनिम्बार्कस्य। (३२७६८)
(पञ्चदशाक्षरावृत्तिः)
१। गुरुनिधनमनुलघुरिहशशिकला॥
मलयजतिलकसमुदितशशिकला
व्रजयुवतिलसदलिकगगमगता।
सरसिजनयनहृदयसलिलनिधिं
व्यतनुतविततरभसपरितरलम्॥
२। स्रगियमपिचरसनवरचितयतिः॥
अयिसहचरि रुचिरतरगुणमयी
म्रदिमवसतिरनपगतपरिमला।
स्रगिवनिवसविलसदनुपमरसा
मुमुरिपुमुदितदनुजदलनहृदये॥

३। वसुमुनियतिरिति मणिगुणनिकरः॥
नरकरिपुरवतु निखिलसुरगति
रमितमहिमभरसहजनिवसतिः।
अनवधिमणिगुणनिकरपरिचितः
सरिदधिपतिरिव धृततनुविभवः॥
४। ननमयययुतेयं मालिनी भोगिलोकैः॥
मृगमदकृतचर्चा पीतकौशेयवासा
रुचिरशिखिशिखण्डाबद्धधम्मिल्लपाशा।
अनृजुनिहितमंसे वंशमुत्क्वाणयन्ती
कृतमधुरिपुलीला मालिनी पातु राधा॥
५। एकन्यूनौ विद्युन्मालापादौ चेल्लीलाखेलः॥
पायाद्वो गोविन्दः कालिन्दीकूले श्रीगोपीचक्रे
रासोल्लासक्रीडद्गोपीभिः सार्धं लीलाखेलन्।
मन्दाकिन्यास्तीरोपान्ते स्वैरक्रीडाभिर्लोलो
यद्वद्देवानामीशः स्वर्वेश्याभिः खेलन्तीभिः॥
मा कान्ते पक्षस्यान्ते पर्याकाशे देशेऽस्वाप्सीः
कान्तं वक्त्रं वृत्तं पूर्णं चन्द्रं मत्वा राहोश्चेत्।
क्षुत्क्षामः शश्वद्भ्रान्तश्चेतो राहुः क्रूरः ग्रासात्
तस्माद्ध्वान्ते हर्म्यस्यान्ते शय्या कान्ते कर्त्तव्या॥
इति कण्ठाभरणः।

६। विपिनतिलकंनसनेरफ्गुग्मैर्भवेत्॥
विपिनतिलकंविकसितंवसन्तागमे
मधुकृतमदैर्मधुकरैःक्वणाद्भिर्वृतम्।
मलयमरुताऽचितलास्यमालोकयन्
व्रजयुवतिभिर्विहरतिस्ममुग्धोहरिः॥
७। नूनंकिंसमानिकापरह्वयंविनान्तमम्॥
सानुवर्णकेतकेविकाशिभृङ्गपूरितं
पञ्चबाणबाणजालपूर्णहेमन्तकस्य।
राधिकाविनतकौमाधवायमासिमाधवे
मोहमेमिनिर्भरंत्वयाविनाकलानिधे॥
८। श्रोमोयोन्चेऽङ्कवेन्तांसञ्जास्यकेश्वंडलेखा॥
विहरेतेमुरारेःपारणप्रकाशात्कृशाङ्गी
ज्ञानच्छायेऽङ्कूलेनभ्राजतेविभ्रतीसा।
राधाम्भोरुहस्यगर्भेलीनायथाचन्द्रलेखा
किन्चाज्ञात्वांस्मरन्तीधन्नेक्ष्कवंजीवयोगम्॥
९। विज्ञानामरूकंरथिवंचेतद्वयोमायकारी॥
गोपालीलीलालोलायच्छन्कलिंदात्मजांते
खेलन्मुक्ताहारारण्यस्वगलसम्मूर्छविद्या।
केसारातिम्नूतितच्छन्महृदिक्रीडतीयम्
कोऽन्यःस्वर्गोमोक्षोवास्माछ्यतेतन्नजाने॥

अष्टिः । (६५५३६)

(षोडशाक्षरावृत्तिः)

१। चित्रसंज्ञमीरितंसमानिकापदद्वयन्तु ॥

विद्रुमारुणाधरोष्ठशोभिवेणुवाद्यहृष्ट
वल्लवीजनांगसंगजातपुण्यकण्टकाङ्ग ।
त्वामदैववासुदेवपुण्यलभ्यपाददेव·
वन्यपुष्पचित्रकेशसंस्मरामिगोपवेश ॥

२। भत्रिनगैः स्वराङ्कमृषभगजविलसितम् ॥
योहरिरुच्चखानखरतरनखशिखरै-
र्दुर्जयदैत्यसिंहसुविकटहृदयतटम् ।
किंन्विहचित्रमेतदखिलमपहृतवतः
कंसनिदेशहृष्यदृषभगजविलसितम् ॥

३। गजतुरगविलसितम्मितिशम्भौ ॥
भात्समतनगेरच्छेदैस्यादिहचकिता·
दुर्जयदनुजश्रेणीदुश्चेष्टाशतचकिता ।
यद्भुजपरिघत्रातायातासाध्वसविगमम् ।
दीव्यतिदिविषन्मालाशश्वन्नन्दनविपिने·
गच्छतशरणंकृष्णंतंभीताभवरिपुतः ॥

४। प्रमाणिकापदद्वयंवदन्तिपञ्चचामरम्॥
सुरद्रुमूलमण्डपेविचित्ररत्ननिर्मिते
लसद्वितानभूषितेसलीलविभ्रमालसम्।
सुरांगनाभवल्लवीकरप्रपञ्चचामर
स्फुरत्समीरवीजितंसदच्युतंभजामितम्॥
५। म्भौन्मौगोमदनललितावेदैःषड्भिः॥
विभ्रस्यत्स्रग्गलितचिकुराधौताधरपुटा
ग्लायत्पत्रावलिकुचतटीस्वेदोर्मितरला।
राधात्यर्थंमदनललितान्दोलालसवपुः
कंसारातेरतिरसमहोवक्तीतिचटुलम्॥
६। ननभजरैःसदाभवतिवाणिनीगयुक्तैः॥
स्फुरतुममानने ऽघननुवाणि।नीतिरम्यं
तवचरणप्रसादपरिपाकतःकवित्वम्।
भवजलराशिपारकरणक्षमंमुकुन्दं
सततमहंस्तवैःस्वरचितैःस्तवानिनित्यम्॥
७। यमौनःस्रौगश्चप्रवरललितंनामवृत्तम्॥
भुजोत्क्षेपःशून्येचलवलयझङ्कारमुक्तो
सुधापादन्यासःप्रकटिततुलाकोटिनादः।
स्मितंवक्त्रेऽकस्मादपिपङ्कजाक्षोमिलीला
हरौनीयादीदृक्प्रवरललितंवल्लवीनाम्॥

८। द्विगुणितवकुलद्युभिखलधृतिरिह॥
तरणिदुहितृतटरुचिरतरवसति
रमरमुनिसुरखजनविहितनुतिरिह।
मुररिपुरभिनवजलधररुचितनु
खलधृतिमर्दयतिस्फुरन्मतिहृदिःखलु॥
९। गरुडरुतंनओभजतगायद्दासुल्लता॥
भ्रमरमधूरमानसमुद्रपयोदध्वनि
गरुडरुतंसुरारिभुजगेन्द्रसंत्रासने।
धरणिभरावतारविधिडिण्डिमाडम्बरः।
सज्जयतिकंसरंगभुविसिंहनादोहरेः॥

अत्याष्टिः। (१३।०७२)
(सप्तदशाक्षरावृत्तिः)

१। रसैरुद्रैश्छिन्नायमनसभलागःशिखरिणी॥
करादस्यस्रस्तोननुशिखरिणीहइपतिशिशो
र्विलीनाःस्मःसत्यंनियतमवधेयंतदखिलैः।
इतित्रस्यद्गोपानुचितनिभृतालापजनितं
स्मितंबिभ्रद्देवोजगदवतुगोवर्द्धनधरः॥

२। जसौजसयलावसुग्रहयतिश्चपृथ्वीगुरुः॥
उदस्तदितिजेश्वरप्रकरदुस्थपृथ्वीभरं
जहारनिजलीलयायदुकुलेवतीर्याशुयः।
सस्वभगतागतिपुरीतभारमस्मादृशां
हरिष्यतिहरिःस्तुतिस्मरणाद्वाउभिलाषितः॥
३। दिङ्मुनिवंशपत्रपतितंभरनभनलगैः॥
नूतनवंशपत्रपतितंरजनिजललवं
पश्यपुरून्दमौक्तिकमिवोन्नमरकतगम्।
सघवनस्वकोरनिकरःप्रपिबतिसुदृशो
वान्तमवेत्यचन्द्रकिरणोरमृतकणमिव॥
सम्प्रतिलब्धजन्मशनकैःकथमपिलघुनि
क्षीणपयस्युपेयुषिभिदांजलधरपटले।
खण्डितविग्रहंबलभिदोधनुरिहविविधाः
पूरयितुंभवन्तिविभवःशिखरमणिरुचः॥
वंशपत्रपतितेनेतिकेचित् इतिभारवौ॥
४। मन्दाक्रान्ताम्बुधिरसनगैर्मोभनौतौगयुग्मम्॥
प्रेमालापैःप्रियविततरैःप्रीणितालिंगनाद्यैः।
मन्दाक्रान्तानन्दतुनियतंवश्यतामेतिवाला।

एवंशिक्षावचनसुधयाराधिकायाःसखीनां
प्रीतःपायात्स्मितसुवदनोदेवकीनंदनोनः॥
५। नसमरसलागःषड्वेदैर्हयैर्हरिणीमता।
व्यथितसविधिर्नेत्रैर्नीत्वाङ्कवेहरिणीगणाः
व्रजमृगदृशांसन्दोहस्योल्लसन्नयनश्रियम्।
यदयमनिशंदृष्ट्वाश्यामेमुरारिकलेवरे
व्याकिरदधिकंवक्राकाङ्क्षेविलोलविलोचनम्॥
६। यदिभवतोनजौभजजलागुरुनर्दटकम्॥
व्रजवनितावसन्तलतिकाविलसन्मधुपं
मधुमथनंप्रणम्रजनवाञ्छितकल्पतरुम्।
विभुमभिनौतिकोऽपिसुकृतीमुदितेनहृदा
रुचिरपदावलीघटितनर्दटकेनकविः॥
७। हयर्तुसागरैर्यतियुतंयदिकोकिलकम्॥
लसदरुणेक्षणांमधुरभाषणमोदकरं
मधुसमयागमेसरसकेलिभिरुल्लसितम्।
अतिललितश्रुतिंरविसुतावनकोकिलकं
ननुकलयामितंसखिसदाहृदिनन्दसुतम्॥
८। वेदर्त्वश्वैर्मभनमयलागश्चेत्तदाहारिणीः॥
यस्मात्तस्मेक्षितिरुवलयेश्रीशालिनीलोचने
रागःस्वीयोऽधरकिसलयेलाक्षारसारञ्जनमः।

गौरीकान्तिःप्रकृतिरुचिरारम्याङ्गरागच्छटा
साकन्तारेरजनिनकथंराधामनोहारिणी॥
९। भाराक्रान्तामभनरसलागुरुःकीर्तिर्वेदर्तुहयैः॥
भाराक्रान्ताममनतनुर्यंगिरीन्द्रविधारणात्
कम्पंधत्तेश्रमजलकणान्नतथापिविमुञ्चति।
इत्याहूतंभञ्जयतिजलदध्वनाकुलवल्लवी
संश्लेषोत्थंस्मरविलसितंविलोकयतुहरिः॥

धृतिः। (२६२१४४)
(अष्टादशाक्षरावृत्तिः)

१। स्याद्भूतर्त्वश्वैःकुसुमितलतावेल्लितामतौनयौयौ॥
क्रीडत्कालिन्दीललितलहरीवारिभिर्दीक्षिताभि
र्वातैःखेलद्भिःकुसुमितलतावेल्लितामन्दमन्दम्।
भृङ्गालीगीतैःकिसलयकराह्वासितैर्लास्यलक्ष्मीं
तन्वानांसेमारंभसतरलंचक्रपाणिश्चकार॥
गौडेऽपिस्यान्नदधिसतक्रशर्करंनिर्जलंमध्यमन्नम्
इतिवैद्यके॥
२। नजभजरैस्तुरेफसहितैःशिवैर्हयैर्नन्दनम्॥
नगशिखतानतरंगपवनैःसलीलमान्दोलितं
मधुरिपुपादपङ्कजरजःसुपूतपृथ्वीतलम्।

मुरहरचित्रचेष्टितकलाकलापसंस्मारकं
क्षितितलनंदनंव्रजसरोजसुखायवृन्दावनम्।
अहहनधनेश्वरस्यसुधियःसमेतमायोधननम्
नमहिमितोविलोक्यविबुधैःकृतोन्नमायोधनम्॥
विभवमदेननिह्नुताह्रियातिमात्रसम्पन्नकं
व्यथयतिसन्मथाद्धिगतनाथदेहसम्पन्नकम्॥
इतिभेदौ ॥

३। इहननरचतुष्कसृष्टंतुनाराचमाचक्षते ॥
दिनकरतनयातटीकाननेचारुसंचारिणी
श्रवणनिकटकृष्टमेणीक्षणाकृष्णराधात्वयि।
ननुविकिरतिनेत्रनाराचमेषातिहृच्छेदनं
तदिहमदनविभ्रमोद्भ्रान्तचित्तांविधत्स्वकृतम्॥
रघुपतिरपिजातवेदोविशुद्धांप्रगृह्यप्रियां
प्रियसुहृदिविभीषणेसंक्रमय्यश्रियंवैरिणः।
रविसुतसहितेनतेनानुयातःससौमित्रिणा
भुजविजितविमानरत्नाधिरूढःप्रतस्थेपुरीम्
इतिरघौ ॥

४। मन्दाक्रान्तानपरलगुयुताकीर्त्तिताचित्रलेखा॥
शर्कैश्छिन्नजगतिमृगदृशांसारसर्वस्वमासी
द्राक्कृष्णंव्रजयुवतिसभावेधसासाव्यधायि।

नैतादृक्केवलंकथमुदधिसुतामन्तरेणाच्युतस्य·
श्रीतत्त्वस्यानपत्यस्तुगमभूत्त्विवलेखाद्भुतायाम् ॥
५। नःसोजःसततसारिनेत्राम्बुभिःश्रीईललितंम ॥
कृत्वाकंसमृगेपराक्रमविधिंश्रीईललितम
पश्चात्केशिनिभारकारिष्टुदरंचैषप्रभृतिषु ।
सन्तोषंपरमंतुदेवनिवहैस्त्रैलोक्यशरणं·
श्रेयोनःसततोत्वपारमहिमालक्ष्मीप्रियतमः ॥

इतिस्तुतिः । (५२४२८८)
(दुर्लभशास्त्रसाराहृतिः)

१। रसर्त्वश्वैर्यमौन्सौररगुरुयुतौमेघविस्फूर्जितास्यात् ॥
कदम्बामोदाढ्याविपिनपवनाःकेकिनःकान्तकेकाः
विनिद्राःकन्दल्योदिशिदिशिमुदादर्दुराहृद्यनादाः ।
निशानृत्यद्विद्युद्विलसितलसन्मेघविस्फूर्जिताचेत्
प्रियःस्वाधीनोसौदनुजदलनोराज्यमस्मात्किमन्यत् ॥
उदञ्चत्कावेरीलहरीषुपरिष्वंगरङ्गेलुठन्तः
कुहूकाराकण्ठीरवरवबलवत्त्रासितप्रोषितेभाः ।
अमीचैत्रेमैत्रावरुणितहरितःकेलिकर्णाटसीम
वलद्धल्लीहल्लीसककुसुमभयघ्रातिश्चञ्चन्तिवाताः ॥
इतिकस्यचित् ॥

२। भवत्येवच्छायानयुगगयुतास्याद्वादशांते यदा॥
अमीषुंजसोयोविनरतिलसद्दोश्चारुशाखोज्ज्वलः
स्फारस्त्रानारतलतवाकिनतनुच्छिन्नांशुकालम्बिनः।
नयस्यास्तुच्छायामुपगतवतांसंसारतीव्रातप
स्तनोतिप्रोत्तापंजयतिजगतांकेसारिकल्पद्रुमः॥
३। सूर्याश्वैर्यदिमःसजौसततगाःशार्दूलविक्रीडितम्।
गोविन्दंप्रणमोत्तमाक्षरसमेतंघोषयाहर्निशं
पाणीपूजयतंमनःस्मरपदेतस्यालयंगच्छतम्।
स्वचेतकृताखिलंममहितंशीर्षोदयस्तद्ध्रुवं
नेप्रक्षेभवतांकृतेभवमहाशार्दूलविक्रीडितम्॥
४। म्रौभ्नौयोनोत्रयेणत्रिमुनिकरगैग्रहस्रग्धराम्॥
कामक्रीडासतृष्णोमधुसमयसमारम्भरभसात्
कालिन्दीकूलकुञ्जेविहरणकुतुकाकृष्टहृदयः।
गोविन्दोवल्लवीनामधररसमुधांप्राप्यमधुरसां
शाङ्केपीयूषपानैःप्रचयकृतसुखंव्यस्मरद्रसौ॥
५। म्रोगौनौनौगौस्वरहयतुरगैःकृत्तदामप्रसिद्धम्॥
शश्वल्लोकानांप्रकटितकदनंध्वस्तमालोक्यकंसं
हृष्यद्भिर्नोभिरिद्धैर्दिविवसतिभिर्व्योमसंस्थैर्विमुक्तम्।

मुग्धामोदेनस्थगितदशदिगाभोगमाकृष्टभृङ्गं
मौलौदेव्यारेन्र्यपतदनुपमंस्वस्तरोः कुड्मलाम·॥

कृतिः । (१०४८५७६)
(विंशत्यक्षरावृत्तिः)

१। ज्ञेयासप्ताश्वषड्भिर्मरभनययुताम्लौगःसुवदना॥
प्रत्याहृत्येन्द्रियाणित्वदितरविषयान्नासाग्रनयना
न्तोध्यायन्तीनिकुञ्जेपरमपुरुषंहर्षोऽप्यपुलका।
सास्राकृष्णकृष्णाक्षीवसतिसुवदनायोगैकरसिका
कामाग्निन्त्वत्कृशाङ्गीनन्तुनरकारेराधाममसखी॥

२। सजजाभरौसलगायदाकथितातदाखलु
गीतिका·॥
करतालचञ्चलकङ्कणस्वनमिश्रणेनमनोरमा·
रमणीयवेणुनिनादरङ्गिमसङ्गमेनसुखावहा।
बहुलानुरागनिवासरासमसमुद्भवानवरागिणा·
विदधेहरिःखलुवल्लवीजनचारुचामरगीतिका॥

इतिमहाकाव्ये·॥

३। वृत्तमीदृशन्तुनामतोरजौरजौरजौगुरुर्लघुश्च·॥
चित्तवृत्तिलीलयाविसर्गरम्यदेहरूपविभ्रमेण·
राजमानसद्वयोविलाससम्पदाकलाकुतूहलेन·।

यः समं झञ्झानाञ्झनाजैने सुराञ्झनानिभैः सुरवंसमेत्य
विस्फुरल्लासचित्रपद्मकोषधृत्पदः समेसदास्तु ॥

४। रसाभ्वाभ्वैः शोभा नयुगगजठरा मेघविस्फूर्जिता चेत् ॥
सदापूर्णनीलन्नरतिजयुगलासध्वनश्चाफलाभ्यां
तयोरुर्वीराजन्नरलाकिसलयाश्लिष्टसुस्निग्धशाखा ॥
लतन्मुक्तारक्तोत्पलकुवलयवक्त्रद्विबन्धाश्रिताया
महाशोभासौलौ मिलदलिपटलैः कञ्जसा कापि वल्ली ॥

प्रकृतिः। (२०९७१५२)
(एकविंशत्यक्षरावृत्तिः)

१। म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ॥
व्याकोषेन्दीवराभाकनककयलसत्पीतवासाः सुहासा
वर्हैरुच्चण्डकान्तैर्वलयितचिकुराचारुकर्णावतंसाः ।
श्रेसव्यासक्तवंशीध्वनिसुखितजगद्वल्लवीभिर्लसन्ती
मूर्तिर्गोपस्य विष्णोरवतु जगति नः स्रग्धरा
हारिहारा ॥

२। ननभननाजरौ यदि तदा गदिता सरसी
कवीश्वरैः ॥

मेघविस्फूर्जितायां महद्व्यान्तकखड्वर्गी परिरहयग
मध्येन सौ विहायनद्वयगुरुद्वाने शोभानाम भवतीत्यर्थः ।

चिकुरकलापशैवलकृतभ्रमहारकुलसङ्गसीर्म्मिषु
स्फुटवदनाम्बुजासु विससङ्गबालमृणालवल्लिषु।
कुचयुगचक्रवाकमिथुनानुगताम्बुकलाकुतूहली
व्यरचयदच्युतो व्रजमृगीनयनासरसीषु विभ्रमम्॥
तुरगशताकुलस्य परितः परमेकतुरङ्गजन्मनः
प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता।
परिचलतो बलानुजबलस्य पुरः सततं धृतश्रियः
श्चिरगलितश्रियो जलनिधेश्च तदाभवदन्तरं महत्॥
इति माघे॥

आकृतिः । (४१९४३०४)
(द्वाविंशत्यक्षरा वृत्तिः)

१। म्भौ गौ नाश्चत्वारो गो गो वसुभुवनयतिरिभवति
हंसी॥
सान्द्रं कान्ते नैकान्ते सा विकचकमलमधुसुरभि पिबन्ती
कामक्रीडाकूतस्फीतप्रमदभरसतरमलघुरसन्ती
कालिन्दीये पद्मारण्ये पवनपतनपरितरलपरागे
कंसाराते पश्य स्वच्छं सरभसगतिरिह विलसति हंसी॥

२। सप्तभकारयुतैकगुरुर्गदितेयमुदारतरामदिरा॥

माधवमासिविकस्वरकेसरपुष्पलसन्मदिरामुदिते
भृङ्गकुलेरुपगीतवनेवनमालिनमालिकुलानिलयम्।
कुञ्जगृहोदरपल्लवकल्पिततल्पमनल्पमनोजरसम्
तंभजमाधविकामृदुनर्तनयामुनवातकृतोपगमम्॥

विकृतिः। (८३८८६०८)
(त्रयोविंशत्यक्षरावृत्तिः)

१। नजभजभाजभौलघुगुरूबुधैस्तुगदितेयमद्रितनया॥

खरतरशौर्यपावकशिखापतंगनिभमग्नदैत्यनिकरो
जलधिसुताविलासवसतिःसतांगतिरशेषमान्यमहिमा।
भुवनहितावतारचतुरश्चराचरधरोऽवतीर्णइहहि
क्षितिवलयेऽस्तिकंसशमनस्तवोदितमसौयदद्रितनया॥
विलुलितपुष्परेणुकपिसंप्रशांतकलिकापलाशकुसुमं
कुसुमनिपातविचित्रवसुधंसशब्दनिपतद्द्रुमोत्कशकुनम्।
शकुननिनादनादितककुविलोलविपलायमानहरिणं
हरिणविलोचनाधिवसतिंबभञ्जपवनात्मजोऽरिवनम्॥

इतिभद्रौ॥

अश्वललितमिदमन्यत्र ॥

२। मत्ताक्रीडं वस्विष्वाशायतिमयुगगणयुगमनुलघु
गुरुभिः ॥

मुग्धोन्मीलन्मत्ताक्रीडं मधुसमयसुलभमधुरसा
गाने याने किञ्चित्स्पन्दस्पदमरुणनयनयुगलसरसिजम्।
रासोल्लासक्रीडत्कृष्णव्रजयुवतिवलयविलसितभुजरसं
साक्षानन्दं वृन्दारण्ये स्मरत नरा मनघपदपरिचयम् ॥

संस्कृतिः। (१६७७७२१६)
(चतुर्विंशत्यक्षरावृत्तिः)

१। भूतमुनीनैर्यतिरिह भतनाः स्भौ भनयाश्च यदि भव
तितन्वी ॥

माधवमुग्धैर्मधुकरविरुतैः कोकिलकूजितमलयसमीरैः
कम्पमुपेतामलयजसलिलैः प्लावनतोऽप्यविमततनुदाहा।
पद्मपलाशैर्विरचितशयना देहजसंज्वरभरपरिहीने
निःश्वसती साश्रुरतिपरुषं ध्यानलयेन वने वसतीतन्वी ॥

अतिकृतिः।(३३५५४४३२)
(पञ्चविंशत्यक्षरावृत्तिः)

। क्रौञ्चपदास्याद्भोमसगाश्चेद्दिशरवसुमुनियति
मनुलघुगैः ॥

क्रौञ्चपदालीचित्रिततीरानन्दकलरवगकुलकलकलरुचिरा
फुल्लसरोजश्रेणिविलासामधुमुदितमधुपरवंरम्यकरी।
फेनविलासाप्रोज्ज्वलहासाललितमनहारि भरपुल
कितस्तनतुः ॥
पश्यपहरेश्सौकस्यनचेतोहरतितरलगतिरीह
मकिरराजा ॥

उत्कृतिः। (६७१०८८६४)

(षड्विंशत्यक्षरावृत्तिः)

११ वस्वीशाश्वैश्छेदोपेतंममतनयुगलसभजगै
र्भुजङ्गविजृम्भितम् ॥

हेलोदस्यन्नस्यत्पादप्रकटविकटनटनभरोत्सरात्
करतालक
श्चारुप्रेंखच्चूडावर्हः क्वणिततरलमणिकिशलय
स्वरांकितहारहक।
उत्सर्पन्नागस्त्रीभिर्भक्त्यामुकुलितकरकमलयुगांकित
स्तुतिरच्युतः)
पायाद्वश्छिन्दन्कालिन्दीह्रदकृतनिजवसति
दृढभुजङ्गविजृम्भितम् ॥

अथदण्डकः ॥

१। यदिहनयुगलंततःसप्तरेफास्तदाचण्डवृष्टिप्रपा
तोभवेद्दण्डकः ॥

प्रलयघनघटामहाम्भमेघावलीचण्डवृष्टिप्र
पाताकुलंगोकुलं
सपदिसमवलोक्यसव्येनहस्तेनगोवर्द्धनं
नामशैलंदधल्लीलया ।
